भारत सरकार
GOVERNMENT OF INDIA
राष्ट्रीय पुस्तकालय, कलकत्ता ।
NATIONAL LIBRARY, CALCUTTA.

वर्ग संख्या
Class No. 180. JC

पुस्तक संख्या
Book No. 86.14

रा० पु०/ N. L. 38.

MGIPC—S19—19/1-62/14 LNL (PB)—2-5-70—150,000.

180. Jc. 86. 14.
Byamohabidravanam

व्यामोहविद्रावणम् ।

B.L. 2866
8/3/70

वैष्णवसम्प्रदायमतसंस्थापकम्

श्रीवृन्दावननिवासि-सुप्रसिद्धपण्डितवर-

श्रीयुक्त-रङ्गाचार्य्यस्वामिप्रणीतम्

तद्गुणग्राहिणा तत्सुहृदा केनचित्

प्रकाशितम् ।

BENGAL LIBRARY
1850
CALCUTTA

कलिकाता

कर्णओयालिस् ष्ट्रीट् १६८ सङ्ख्यभवने

काव्यप्रकाशयन्त्रे

श्रीजगन्मोहनतर्कालङ्कारेण मुद्रितम् ।

शकाब्दः १७९१ ।

विज्ञापनम्।

व्यतीतानि कियन्ति दिनानि, श्रीमता जयपुराधिपतिना तत्त्वबुभुत्सुना वा किमप्यन्यदभिसन्धित्सुना वा, परम्परागताजानिक-रामानुजादिप्रामाणिकमहापुरुषावलम्बित-वैष्णव-सम्प्रदाय-सिद्ध-धर्म्म-कर्मानुष्ठान-पद्धतिं प्रति ईर्ष्याकटाक्षमाक्षिपता, तद्विषयाः कतिचित् प्रश्नाः, "तत्राष्टौ प्रश्नाः प्राधान्येन कृताः" इत्यादिना उद्भाविताः प्रकाशिताश्चासन्। अथात्र मौनमनुचितमित्यभिमन्यमानेन, श्रीमद्वृन्दावनाधिवासिना, श्रीमता रङ्गाचार्य्यस्वामिना, रामानुज-मतावलम्बिनाऽपरेणेव साक्षाद्रामानुजावतारेण, विद्वत्तमेनाधिगताखिलनिगमेन, तदुत्तरपरो दुर्जनकरिपञ्चाननो नामैकः सन्दर्भो निरमायि। तथापि चित्तप्रसादमलभमानेन, जयपुराधिपतिना, 'सदोषोऽयं सन्दर्भः' इति प्रतिपिपादयिषया तत्खण्डनायातीव यतमानेन सज्जनमनोऽनुरञ्जनाभिधेयं प्रकरणमेकं निर्माय प्राचारि।

"सज्जनमनोऽनुरञ्जनम्" इति नाम्नैवात्र ऋजुधियां व्यामोहो मा भूदिति व्यामोहापनुत्तये तत्रत्यकुहकमखिलमाविष्कुर्वन्, दोषतयाभिमतानान्तु [illegible]ाक्तानां सर्वेषां दोषाभासताञ्च स्फुटं प्रतिपादयन् स्वकृतिदुर्जनकरिपञ्चाननव्याख्यानोपबृंहितं नानाशास्त्ररत्नसङ्कुलं व्यामोहविद्रावणं नाम बृहदिदं प्रकरणं पुनः स एव स्वामी प्रणिनाय।

तदिदं साधारणसौलभ्याय मुद्रितं प्रकाशितञ्च। अत्र च स्वामिना पाण्डित्यं कीदृशं प्रदर्शितमित्यत्र किमपि वयं न ब्रूमः। तदुद्भावनशक्तिमन्तो धीमन्त एव अवलोकयन्तोऽनुभवन्त्वित्यास्तां विस्तरः।

प्रकाशकस्य कस्यचित्।

साङ्केतिकचिह्नज्ञापनम् ।

सङ्केतः ।	सङ्केतस्यार्थः ।
प्र० किं वा प्रश्नः	जयपुराधिपतिकृतप्रश्नावलि-पङ्क्तिः ।
दुर्ज०	दुर्जनकरिपञ्चाननपङ्क्तिः ।
टी०	दुर्जनकरिपञ्चाननस्य टीका ।
सज्ज०	सज्जनमनोऽनुरञ्जनपङ्क्तिः ।
व्या०	सज्जनमनोऽनुरञ्जनस्य खण्डनपरा व्यामोहविद्रावणस्य पङ्क्तिः ।
अ०	अपरा वाह्यशङ्का, तत्खण्डनञ्च ।

व्यामोहविद्रावणम् ।

श्रीमते रामानुजाय नमः ।

अवतु पुरुषसिंहः श्रीनिवासो दयालु-
र्निखिल-विनत-रक्षा-दीक्षितो वेदवेद्यः ।
नख-विदलित-दैत्य-क्रोड़-पृथ्वीधरोद्यद्-
वितत-रुधिरधारा-रञ्जिताशेष-काष्ठः ॥१॥

जयपुरनिकेतनः कोऽपि सज्जनमनोनुरञ्जनं नाम्ना ।
कृत्वा दुर्जनकरिपञ्चानन-खण्डनमकुरुत वाङ्मात्रैः ॥२॥

तद्दृष्ट्वा केषाञ्चिन्मा भूद्व्यामोह इत्ययं यत्नः ।
सज्जनकृपया सुधियो रङ्गाचार्य्यस्य सफलतां यायात् ॥३॥

दुर्जनकरिपञ्चाननभावं ज्ञात्वा स खण्डनं कुर्य्यात् ।
सन्तोषः सुधियां स्यात् नो चेत् पीड़ा हि महती स्यात् ॥४॥

ये मात्सर्यलवानभिज्ञमनसो निष्पक्षपाताः स्वके
पुत्रे शत्रुजनेऽपि नित्यविगतासूया गुणग्राहिणः ।
ते कृत्वा करुणामकाण्डरुचिरां नित्यं विनीते मयि
स्वीकुर्वन्तु मदीयवाक्यरचनामेतां विचार्य्य स्वयम् ॥५॥

मया कृतं दुर्जनहस्तिपञ्चाननं विलक्षन् बहुशोऽप्रसक्तान् ।
वैजात्यमात्रेण परोक्तदोषान् निराकरोम्यत्र तु लेशयैव ॥६॥

दुर्ज० "अत्राष्टौ प्रश्नाः प्राधान्येन कृताः। तत्र प्रथमः सम्प्रदायविषयकः" इति।

टी० अत्र प्रश्नावल्याम्, "प्राधान्येन" इत्यत्र तृतीया "प्रकृत्यादिभ्य उपसंख्यानम्" इत्यनुशासनसिद्धा वैशिष्ट्ये, प्रधानीभूता इत्यर्थः। प्रश्नानां प्राधान्यं च अनन्तराभिधेय-वाक्यार्थ-ज्ञान-जनकोत्तराभिधान-प्रयोजक-जिज्ञासा-बोधकानन्तर-प्रश्नार्थज्ञानानुकूलोत्तराभिधानप्रयोजकत्वं, जिज्ञासायास्तत्प्रयोजकत्वं च उत्तरयितृपुरुष-वृत्ति-प्रतिपाद्य-पुरुषीय-प्रकृतार्थज्ञानाभाव-निबन्धनं यद्दुःखं, तन्निवृत्तिसाधन-प्रकृतार्थज्ञानहेतूत्तराभिधान-कारणीभूत-बुबोधयिषाजनकं यत् प्रतिपाद्य-पुरुषीय-प्रकृतार्थ-ज्ञानेऽसिद्धत्वज्ञानं तत्प्रति लिङ्गविधया जनकत्वं वादे; जल्पे तु परपराजयहेतु-पराज्ञानात्मक-निग्रहस्थानानुमापकोत्तरा-भावप्रतियोग्युत्तरावश्यकर्त्तव्यताज्ञानद्वारा। उत्तरस्य प्रश्नार्थ-ज्ञानानुकूलत्वं च प्रश्नार्थविशिष्टैकदेशविशेषण-ज्ञानजनकत्वम्। 'तत्र' प्रश्नेषु, 'प्रथमः' स्वप्रागभावासमानकालीन-स्वघटित-ग्रन्थघटक-यावत्प्रश्नकः, स्वघटितग्रन्थघटक-प्रश्न-ध्वंसासमानकालीनो वा; 'सम्प्रदायविषयकः' सम्प्रदायशब्दार्थत्वावान्तरधर्म-जिज्ञासाबोधकः।

प्रश्न० "सम्प्रदायशब्दस्य कोऽर्थः?" इति। दुर्ज० "पूर्वपूर्वैः स्वशिष्येभ्यः कृतस्योपदेशस्य विषयीभूतो ह्यर्थः सम्प्रदायशब्दार्थः, पूर्वपूर्वैः, 'सम्यक् येनाक्षरं पुरुषं वेद, सत्यं प्रोवाच, तां तत्त्वतो ब्रह्मविद्याम्' इत्युक्तप्रकारेण प्रदीयते उपदिश्यते 'शमि-

त्पाणिः' इत्याद्युक्त-शमदमादिगुणयुक्तानामुपसन्नानामिति तद्युत्पत्तेः" इति ।

टी०, 'पूर्वपूर्वैः' 'तत्तदाचार्य्यैः,' येनाक्षरम् इत्यादिश्रुत्युदाहरणमारभ्यात् श्रुत्युक्ताचार्य्यलक्षणमभिप्रेतं, तल्लक्षणं च 'श्रोत्रियं ब्रह्मनिष्ठम्' इत्याभ्यामुक्तम्। 'श्रोत्रियं' श्रुतवेदान्तं, 'ब्रह्मनिष्ठं' ब्रह्मोपासकम् । श्रुतवेदान्तोऽपि हि कश्चित् स्वकर्मपाकवशादब्रह्मनिष्ठो दृश्यते। अनेन कवीरदासादिभिरुपदिश्यमानोऽर्थो वेदान्तविरुद्धो न सम्प्रदाय इति सिद्धम्। येनाक्षरमित्यादि, 'येन' विज्ञानेन, 'तद्विज्ञानार्थम्' इति प्रक्रमात्; 'पुरुषं' सर्व-वेदान्तोपसंहार भूत-पुरुषसूक्त-नारायणानुवाकादिसिद्धम्, 'अक्षरं' स्वरूपतोऽविकारं, 'सत्यं' गुणतोऽविकारम्; आभ्याम् अचिज्जीवव्यावृत्तिः। 'वेद' उपास्ते, 'तां' ब्रह्मविद्यां, 'तत्त्वतो' याथार्थ्येन, 'प्रोवाच' प्रब्रूयात्, उपदिशेदित्यर्थः। श्रुत्युदाहरणपुरःसरं समुपसर्गार्थमुक्त्वा प्रोपसर्गघटितशेषपदार्थमाह, 'प्रदीयते उपदिश्यते' इति, उपसर्गवशाद्धातूनामनेकार्थतेति भावः। 'समित्पाणिः' इत्यादिना, उपसन्नाय शमान्विताचेति श्रुत्युक्तशमदमादिगुणयोगं शिष्यलक्षणमाह। अनेन जल्पप्रवृत्तेनाविनीतवादिविजयार्थं शास्त्रविरोधेनाप्युक्तोऽर्थो न सम्प्रदाय इत्युच्यते 'तद्युत्पत्तेः' इति। अत्रायं भावः, सम्-शब्दः सम्यगर्थः, प्रशब्दश्चोपक्रमार्थ इति आदितः सम्यग्दीयमान इति "अकर्त्तरि च कारके" इत्यनुवृत्त्या भावे च घञ्, तथा"ऽकर्त्तरि च कारके" इति कर्मणि घञुत्पत्तौ सम्प्रदायशब्दस्य योगरूढ़िलेन

नामत्वात् । केवलयौगिकत्वेऽपि न दोषः, "संज्ञायाम्" इत्यस्य प्रायिकत्वात् । अतएव 'को लाभो भवता लब्धः' इति तत्रत्योदाहरणं संगच्छते । इति प्रबन्धात् सम्प्रदायशब्दार्थ एव प्रतितन्त्रशब्दार्थ इत्याह, अयमेवेत्यादिना, 'प्रतितन्त्रसिद्धान्तः' इति, उच्यते इत्यर्थः ।

सम्प्र० इति रामानुजीयाः, अथोत्तरत्र सन्निहितवाक्यद्वये तत्रेति पदविन्यासदर्शनेन तत्राप्यन्वयानर्हस्य सर्वतः पूर्वं बुद्धिस्थोक्ताधिकरण-प्रतिपादक-तत्रेतिपदस्य न्यासेन च संकुचितातिदुरूहत्वाभिप्रायकात्मकृत-प्रश्नस्योत्तरं प्रवदतां, सन्निहित-पूर्वपरोपस्थितस्यैव तत्शब्देन परामर्श इति सार्वजनीनानुभव-स्वीकार-कातराणामभिप्रायं साकल्येन ज्ञातुमशक्नुवद्भिरपि किञ्चित् प्रत्युच्यते, यत्तावत् कर्मव्युत्पन्न-सम्प्रदायशब्दमभ्युपेत्य पूर्वपूर्वैः कृतस्योपदेशस्य विषयीभूतोऽर्थः सम्प्रदायशब्दार्थ इति, सम्यक् प्रदीयते उपदिश्यते इति व्युत्पत्ति-प्रदर्शनपुरःसरं महता प्रयासेनोक्तं तत्समीचीनमपि भवेत्, परन्तु दादिशधात्वोः समानार्थकयोरपि संप्रेत्युपेत्युपसर्गभेदेन भिन्नार्थकत्वसम्भावनयाऽथ च पाणिनीय-व्याकरणे सम्प्रदाय इत्युपदेश इत्येतदानुपूर्वी निष्पादकानुपूर्वी विशिष्टकर्मार्थकप्रत्यय-विधायकानवगतत्वेन गुरु-पारम्पर्य्यागतव्यवहारमात्रार्थकतया सौकर्य्येणोपपत्तिसम्भवे बाऊलकत्वाद्यगतिकगतिमाश्रित्यातिकष्ट-कल्पनया कर्मार्थकत्वप्रतिपादनस्यान्याय्यत्वेन च संशयोऽप्यस्माकं कश्चिज्जायते । स च पुनर्विचारित-प्रतिवचनेन अपनीयतां भवद्भिः" इति ।

तत्खण्डनम् ।

व्या० इत्येतदतीवासमञ्जसं प्रतिभाति, तथाहि उत्तरत्र सन्निहितवाक्यद्वये तत्रेति पदद्वयं हि भवत्प्रश्नस्य न दुरूहत्वाभिप्रायसूचकम्; एकस्य वचनव्यत्यासेनानुषक्त-प्रश्नपदार्थेनाभेदेनान्वयिनि प्रथमपदार्थे स्वरूपेण निरूपकतासम्बन्धेन वा अन्वयिनोऽधिकरणत्वस्याधेयत्वस्य वा घटकतासम्बन्धावच्छिन्नस्य सम्बन्धित्वस्य सम्बन्धत्वस्य वा तथाविधस्य तत्सम्बन्धावच्छिन्नाधेयत्वाधिकरणत्वयोरिव तथाविधसम्बन्धित्वादेरपि तत्सम्बन्धरूपत्वमिति मतेन घटकतापर्यवसन्नस्य बोधकेन त्रलप्रत्ययेन युक्तस्य प्रागुपस्थित-प्रश्नबोधकत्वात्, द्वितीयस्य च तादृशः प्रश्नावलीघटकस्य प्रकृतप्रष्टव्यपदार्थ-परामर्शकतया प्रकृतप्रष्टव्यपदार्थजातघटकं सम्प्रदायशब्दस्यार्थः कः? इत्यर्थलाभात्, तत्रापीत्यादिकमप्यत्यसंगतम्, न हि कश्चिदनुन्मत्तोऽन्वयानर्हपदघटितं वाक्यं प्रयुङ्क्ते, तस्य निराकाङ्क्षत्वेनार्थप्रत्यायकत्वाभावात् । एवं "सर्वतः पूर्वम्" इत्यादिना भवदनूदित-दुर्जनकरिपञ्चाननीय-प्रथमवाक्यस्थं तत्रेति पदं विवक्षितम् उत प्रश्नावली-प्रथमवाक्यस्थम्? नाद्यः तत्र 'अत्र' इतिपदस्योक्तार्थस्य प्रयोगेन तत्रेति पदाभावात्, यद्यस्मदनुक्तमप्यारोप्य दूषणमिदं ब्रूषे, तदा तवैव दूषणम् । नान्त्यः, अन्वयस्याभिहितप्रायत्वात् । एवं तत्शब्देन सन्निहित-पूर्वपरोपस्थितस्यैव परामर्श इति कश्चिद्व्युत्पन्नो न वक्तुमलम् । तान्त्रिकैस्तत्शब्दस्य बुद्धिविषयतावच्छेदकत्वोपलक्षित-धर्मावच्छिन्ने, वस्तुतः स्वाश्रयनिरूपितविषयतावच्छेदकत्व-

सम्बन्धेन बुद्धित्वोपलक्षितधर्मावच्छिन्ने वा शक्तिस्वीकारात्, उपलक्षणधर्मस्य तत्सम्बन्धस्य वा घटकीभूता बुद्धिः क्वचित् पूर्वपरपदाधीना, क्वचित् प्रकरणाधीना, क्वचित् प्रत्यक्षरूपा। एतदभिप्रेत्याव्यवहितपूर्वोपस्थितपरामर्शकत्वमभिदधति ।

यदि साकल्येनास्मदभिप्रायं वेदितुं न शक्नुवन्ति भवन्तः ? तर्हि तद्वेदनशक्तानुपासताम्, न हि साकल्येनाभिप्रायमजानद्भिः खण्डन-मभिधातव्यम्। कस्यचित् यत्तावदित्यादिकमपि न सम्यक्, समानार्थकयोर्दा-दिशधात्वोः संप्रेत्युपेत्युपसर्गभेदेन भिन्नार्थकत्वसम्भावना भवतां यदि स्यात्तर्ह्येकस्य सा आङ्पूर्वको दिशतिर्नियोक्तृप्रयोजनवचनः उपपूर्वकस्य नियोज्यप्रयोजनवचन इति न्यासकारोक्तेर्निराकार्य्या। अपरस्य तु सम्प्रपूर्वकस्य मुख्यग्रहणं विना स्वस्वत्वध्वंसपूर्वकपरस्वत्वापादक-व्यापाररूप-मुख्यदानार्थकत्वं न सम्भवति, आचार्य्यकर्त्तृक-शिष्यसम्प्रदानक-दानकर्मीभूतेषु शास्त्रार्थेषु स्वत्वध्वंसोत्पादनासम्भवात्, किन्तु शिष्यज्ञानविषयत्वापादनं, तच्चोपदेश एवेति निराकार्य्या। किं च पाणिनीयव्याकरणे आनुपूर्वीविशेषनिष्पादकानुपूर्वीविशिष्ट-तत्तदर्थ-प्रत्यय-विधायकानवगतिः सम्प्रदायशब्द इव रामकृष्णादिशब्देष्वपि समाना, न हि 'रामः' इति दाशरथिः, 'कृष्णः' इति वासुदेव इत्याद्यानुपूर्वी-निष्पादकानुपूर्वीविशिष्टाऽधिकरणकर्त्राद्यर्थकप्रत्ययविधायकावगतिरस्ति येन वैषम्यम् स्यात्। किं च गुरुपारम्पर्य्यागत-व्यवहारमात्रार्थकत्वमपि कर्मार्थकप्रत्ययस्वीकारमन्तरा कथं सम्भवति। न हि व्यवहारमात्रं तदर्थ इति

स्वीकार उचितः, रथ्यापुरुषव्यवहारस्यापि तत्त्वापत्तेः। किन्तु उक्तविशेषणवान् व्यवहारे गुरुपारम्पर्य्यागतत्वं हि गुरु-परम्परा-प्रविष्ट-वक्तृपुरुषकर्त्तृकोपदेशविषयत्वमेव, अन्यस्य दुर्वलत्वात्, स्वतो व्यापारतो वा सविषयक-धातुयोगे कर्मत्वं हि विषयत्वमेव, न त्वत्र बाहुलकत्वाश्रयणमावश्यकं, प्रत्ययविधायक-शास्त्रस्योक्तत्वात्। यदा दानातिसर्जनार्थकयोर्दा-दिशधात्वोः समानार्थकत्वमङ्गीकृत्योपसर्गभेदेन भिन्नार्थकत्वसम्भावनयेत्युक्तं, तत् आदान-निदानातिदेश-प्रदेश-निदेश-सन्देशादिषूपसर्ग-सम्बन्धवशादर्थभेदसत्त्वेऽपि प्रकृते यो गुर्वादिभिः सम्यगुपदिश्यते मन्त्रस्तं प्रकृत्य, ममायं मन्त्र उपदिष्टो गुरुणा, गुरुणायं मन्त्रो दत्त इति शिष्यैरुच्यते, इत्युपदेशार्थकत्वमपि दाधातोर्दृष्टम्।

यच्चोक्तं पाणिनीयव्याकरणे इत्यादि, विधायकानवगतत्वेनेत्यन्तं, तदपि "इको यणचि" "आद्गुणः" "कर्मण्यण्" इत्यादिषूत्सर्गसूत्रेषु लक्ष्यविशेषानुपूर्वीमनूद्यादेशादिविधानादर्शनात् प्रत्युक्तम्। यदपि गुरुपारम्पर्य्यावगतेत्यादि, अन्याय्यत्वेनेत्यन्तमुक्तम्, तदपि न समीचीनम्, अर्थमात्रस्य गुर्वादिद्वारपरम्परोपदिष्टस्यैव प्रामाणिकत्वेनाङ्गीकारात्। "व्यत्ययो बहुलम्" इत्यादिसूत्रस्य-बहुलग्रहणस्य तथात्वेऽपि "कृत्यल्युटो बहुलम्" इति सूत्रस्य-बहुलग्रहणस्य न तथात्वम्। तथाहि "कृत्यल्युटः" इत्येव सिद्धे यत्र विहितास्ततोऽन्यत्रापि स्युरिति क्वचिदन्यदेवेत्यर्थक-बहुल-ग्रहणफले सिद्धे पुनर्बहुलग्रहणं योगविभागेन कृन्मात्रस्य व्यभिचारार्थम्। तेन कृत्यक्तखलर्था भावकर्म्मणोरेव

स्युरिति अन्ययोगव्यवच्छेदार्थकैव शब्दघटितयोरेव "कृत्यक्तख-लर्थाः" इति सूत्रं बाधित्वा स्नात्यनेनेति स्नानीयं चूर्णम्, दीयते अस्मै दानीयो विप्रः, पादाभ्यां ह्रियते इति पादहारकः इत्यादौ करणसम्प्रदानयोरनीयरः, कर्मणि ण्वुलश्च सिद्धिरिति कृत्यल्युटो बहुलमिति सूत्रस्य-बहुलग्रहणस्य विधिसमशीलत्वे-नागतिकगतित्वाभावाच्चेति । सम्प्रदायशब्दस्य साधुत्वप्रक्रिया-वितथम्, सम्प्रदीयत उपदिश्यते इति विवरणेन "श्याद्व्यधास्रु-संस्रुतीणवसावहृलिहश्लिषश्वसश्च" इत्यनेन आदन्ताद्धातोर्बा-हुलकात् कर्मणि "णस्येत्संज्ञालोपयोः सतोरातो युक्चिण्-कृतोः" इत्यनेन आदन्तात्ण्णिति परे युकि सम्प्रदायशब्दसिद्धि-रिति। न चैतदपवादभूतेन उपसर्गे सत्यादन्तात्कः स्यादित्यर्थ-केन "आतश्चोपसर्गे" इत्यनेन केकस्येत्संज्ञालोपयोः कृतयोः अजाद्योरार्धधातुकयोः क्ङिदिटोश्च परयोरातो लोप इत्यर्थ-केन "आतो लोप इटि च" इत्यनेनाल्लोपे तद्रूपासिद्धिरिति वाच्यम् । दायशब्दं साधित्वा सम्प्राभ्यां "कुगतिप्रादयः" इति समासेन तद्रूपसिद्धेः, यथोत्तरकृदन्तभावे अकर्त्तरि च कारके संज्ञायामित्यधिकारे "श्रीणीभुवोऽनुपसर्गे" इत्यनेन घञि श्रायः नायः भाव इत्युदाहृत्य उपसर्गे तु प्रश्रयः प्रणयः प्रभव इति प्रत्युदाहृत्य च कथं प्रभावो राज्ञ इत्याशङ्क्य भावशब्दं साधित्वा ततः प्रशब्देन प्रकृष्टो भाव इति "कुगतिप्रादयः" इति गतिसमासात्समाहितम् ; तथात्रापि बोध्यम् । अतः कर्मणि ण्वुप्रत्ययस्य घञ्प्रत्ययस्य च सम्भवादेव जीमूत-वाहनेन "विभा-

गोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते दायभाग इति प्रोक्तं तद्विवादपदं बुधैः' इति नारदस्मृत्युक्त-दायभागलक्षणे दाय-शब्दार्थविचारे दीयते यः स दाय इति कर्मव्युत्पन्नतया कर्मकता धनबोध इति भावः" इति स्पष्टमेवोक्तम्। एवं वीरमित्रोदय-कारेणापि "विभक्तव्यं पितृद्रव्यं दायमाहुर्मनीषिणः' इति कोशा-द्विभक्तव्यं विभागार्हम्" इति स्पष्टोक्त्या दायशब्दः कर्मणि प्रत्य-यान्त इति सूचितम्। अतएव कुसुमाञ्जल्यां "क्लेशकर्मविपा-काशयैरपरामृष्टो निर्माणांस्तिकायमधिष्ठाय सम्प्रदाय-प्रवर्त्त-कोऽनुग्राहकश्चेति पातञ्जलाः" इति न्यायाचार्य्यानूदित-पात-ञ्जलमत-फक्किकास्थ-सम्प्रदाय-शब्दव्याख्यातृभिर्वर्द्धमानोपाध्यायैः, "सम्प्रदीयते गुरुणा शिष्यायेति सम्प्रदायो वेदः" इति प्रदर्शिता कर्मव्युत्पत्तिः संगच्छते।

उपदेशशब्दोऽपि "उपदेशेऽनुनासिकः" इतिसूत्रस्थोप-देशशब्दार्थव्याख्यातृभिः प्राचीनैः, "धातुसूत्रगणोणादि-वाक्य-लिङ्गानुशासनम्। आगमप्रत्ययादेशा उपदेशाः प्रकीर्त्तिताः" इत्यादिना कर्मव्युत्पत्त्या उत्तराद्धोपात्तानामुपदेशत्वमित्युक्त-मिति कर्मप्रत्ययान्तत्वे निःशङ्कः। न च तत्खण्डितं मनोरमा-यामिति भ्रमितव्यं, खण्डनस्य वैषम्यविषयत्वात्। अतएव, "उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवति" इत्यादिच्छान्दोग्य-मन्त्रस्थादेशशब्दव्याख्यातृभिः शङ्कराचार्य्यादिभिः 'आदिश्यते उपदिश्यते' इति कर्मव्युत्पत्तिः प्रदर्शिता सङ्गच्छते।

"संशयोऽपि" इत्यादिकमप्युपहास्यम्, एवं प्रमाणोपष्टम्भ-

सद्भावेऽपि, सम्प्रदायशब्दः कर्मप्रत्ययान्तः इत्येवं संशयो यदि युष्माकं न निवर्त्तते, तर्हि इष्टकारणेन संशयानिवृत्तेस्तन्नि- वर्त्तकाहृष्टार्थं देवा उपास्यन्तामिति। "किं च तत्खण्डनम् ?" इति महानयं वादिपराजयहेतुर्मन्त्रो भवद्भिरभ्यस्तः, यन्महिम्ना सर्वे वादिनः पलायिताः।

दुर्ज० "अत्र यावान्तर-प्रश्नः प्रथमः।" टी० 'अत्र' पूर्वोक्त- प्रधानप्रश्नानुयायिषु 'अवान्तर-प्रश्नः' प्रधानप्रश्नोत्तर-वाक्या- धीनवाक्यार्थज्ञाननिर्वाह्यशाब्दज्ञानजनकोत्तराभिधानप्रयोजक- प्रश्नः ; 'प्रथमः' स्वसजातीयप्रश्नध्वंसासमानकालीनः। एवं रीत्योत्तरत्रापि प्रथमद्वितीयादिशब्दार्था ज्ञेयाः।

दुर्ज० "कतिः भेदाः?" इति सम्प्रदायत्वावान्तर-धर्मविषयको विभाजकतावच्छेदकावलम्बी।" टी० 'सम्प्रदायत्वावान्तरधर्म- विषयकः' सम्प्रदायत्वानतिप्रसक्तन्यूनवृत्तिधर्मान् स्वघटक-किं- पदार्थान्वितडतिप्रत्ययार्थपुरस्कारेण विषयीकुर्वन्। अत्र विष- यत्वं व्यापारानुबन्धि बोध्यम्। 'विभाजकतावच्छेदकावलम्बी' स्वोत्तर-वाक्यजन्य-शाब्दबोध-प्रकारीभूत-विभाजकतावच्छेदक- प्रकारकज्ञाननिवर्त्त्य-जिज्ञासाघटित-शाब्दबोधजनकः। अत्रेदम- वधेयम्, 'कति भेदाः?' इति प्रश्नवाक्ये, सम्प्रदायस्येति सन्तीति चादावन्ते च पूरणीयम्, अध्याहृत-सम्प्रदायपदोत्तरषष्ठ्याः सम्बन्धित्वेन वृत्तित्वमर्थः। तस्य भेदपदार्थेऽसाधारणधर्मेऽन्वयः, किंपदस्य जिज्ञासितोऽर्थः। तस्य चोद्देश्यतावच्छेदक-डति- प्रत्ययार्थसंख्यायामभेदेनान्वयः। यथोद्देश्यतावच्छेदके किंपदार्थ-

स्याभेदेनान्वयस्तच्च तदन्वयितावच्छेदक-धर्मावच्छिन्न-किंपदार्थान्वयितावच्छेदक-धर्मन्यून-वृत्तिधर्मावच्छिन्नोद्देश्यतावच्छेदकताकप्रकृतविधेयगोचरेच्छा किंपदेन बोध्यते इति नियमः। तथा च सत्तानिष्ठविधेयतानिरूपितभेदपदार्थनिष्ठोद्देश्यत्वीयावच्छेदकता-निरूपित-संख्यात्वन्यूनवृत्ति-धर्मनिष्ठावच्छेदकत्वेन जिज्ञासितो यो धर्मस्तद्वदभिन्नसंख्यावन्तः सम्प्रदायनिष्ठतत्त्वावान्तरधर्मा इति शाब्दबोधः।

अस्य प्रश्नस्योत्तरं,—रामानुजसम्प्रदायो मध्वसम्प्रदायः शङ्करसम्प्रदायो भट्टसम्प्रदायो गुरुसम्प्रदायः कणादसम्प्रदायो गौतमसम्प्रदायः, एवमन्येऽपि सम्प्रदाया इति बहवः सम्प्रदायस्य भेदा इति, सम्प्रदायनिष्ठा विशेषधर्मा बहुत्वत्वावच्छिन्नबहुत्ववन्त इति तदर्थः। एवं ज्ञाने हि किंपदार्थघटकजिज्ञासानिवृत्तिः, यथा कति घटाः सन्तीति प्रश्ने दश घटाः सन्तीत्युत्तरम्, तज्जन्यबोधेन च प्रश्नवाक्यार्थघटक-जिज्ञासानिवृत्तिरिति।

दुर्ज० "तत्रोत्तरं श्रीरामानुज-मध्व-शङ्कर-भास्कर-यादव-नीलकण्ठादि-वेदान्त-मीमांसाविचाराधिकृताचार्य्य-गौतमकणादादि-न्यायशास्त्राधिकृताचार्य्य-भट्टप्रभाकरमिश्रादि-पूर्वमीमांसाविचाराधिकृताचार्य्यादिभिः स्वस्वपूर्वाचार्य्योपदेशानुगुण्येन प्रतिपादिताः प्रतितन्त्रार्था अनेकविधा इति सम्प्रदायस्य बहुत्वम्; अतएव न्यायादिग्रन्थेषु इति 'सम्प्रदायः' इति 'सम्प्रदायविदः' इति च लिख्यते। यद्यपि भावस्याभावत्वेनाभावस्य

भावत्वेन, नित्यस्यानित्यत्वेनानित्यस्य नित्यत्वेन, गुणस्य गुणित्वेन गुणिनो गुणत्वेन, द्रव्यस्याद्रव्यत्वेनाऽद्रव्यस्य द्रव्यत्वेन, अन्यस्यानन्यत्वेनानन्यस्यान्यत्वेन परिणामिनोऽपरिणामित्वेनापरिणामिनः परिणामित्वेन, अणोर्महत्त्वेन महतोऽणुत्वेन च, तत्तदादिभिः प्रतिपादनेन न वस्तुषु विवादः, तथापि वैशिष्ट्यभेदात् सम्प्रदायभेदाः, परस्पर-विलक्षण-वैशिष्ट्यावच्छेदेनासाधारण-प्रतितन्त्रार्थत्वाभ्युपगमात्" इति ।

टी० 'प्रतितन्त्रार्थाः' सम्प्रदाया, 'अनेकविधाः' परस्परासमानाधिकरण-विभाजकतावच्छेदक-धर्मवन्तः । ते च धर्मा रामानुजसम्प्रदायत्वादयः । विभाजकतावच्छेदक-धर्माणामनेकत्वादेव हि विभजनीयस्यानेकत्वम्, यथोष्णत्वशीतत्वानुष्णाशीतत्वानां परस्परविरुद्धानां त्रित्वात् स्पर्शगुणस्य त्रित्वम् । 'इति' हेतौ, सम्प्रदायत्वविशेषाणामनेकत्वाद्धेतोस्तदाश्रयस्य सम्प्रदायस्यानेकत्वमित्यर्थः । 'अतएव' सम्प्रदायशब्दस्योक्तार्थकत्वादेव, भवता, वक्ष्यमाणस्य शास्त्रीय-तद्विरुद्धाविरुद्धव्यवहारस्य तदर्थत्वे तादृशलेखनासङ्गतिः । "असमवायिकारणनाशाद् द्व्यणुकनाशः, समवायिकारणनाशात् त्रसरेणुनाश इति सम्प्रदायः" इत्यादौ तादृशव्यवहाराप्रसक्तेः ; एवं "जात्याकृतिव्यक्तिषु एका पदशक्तिरिति सम्प्रदायविदः" इत्यादावपि तादृशव्यवहाराप्रसक्तेः । एवं प्रत्यक्षमणिदीधितिटिप्पण्याम् "इति मीमांसकानां सम्प्रदायः" इति भट्टाचार्य्योक्तमपि न सङ्गच्छते इति भावः ।

यद्यपीत्यादि, मीमांसकैस्तमसो भावत्वमङ्गीकृतं, नैयायिकैर-

भावत्वम्। गगनस्य नैयायिकैर्नित्यत्वं वेदान्तिभिरनित्यत्वम्। प्रकृतेः सांख्यैर्गुणत्वं सिद्धान्तिभिर्गुणित्वं, ज्ञानस्य सिद्धान्तिभिर्द्रव्यत्वं नैयायिकैरद्रव्यत्वम्, उपादानोपादेययोर्नैयायिकैरन्यत्वं वेदान्तिभिरनन्यत्वम्, आत्मनो जैनैः परिणामित्वम्, आस्तिकैरपरिणामित्वं, तस्यैव नैयायिकैर्महत्त्वं वेदान्तिभिरणुत्वं स्वीकृतम्। न हि तमःप्रभृतिषु कस्यापि विवाद इति भावः। 'वैशिष्ट्यभेदात्' भावत्वादिप्रतियोगिकत्वविशिष्ट-सम्बन्धभेदात् 'सम्प्रदायभेदा' विशेष्यस्यैक्येऽपि विशिष्टस्य विभिन्नतत्तदुपदेश-परम्परागम्यत्वम्। परम्परानङ्गीकृततत्तद्धर्मपुरस्कारेण तत्तत्प्रतितन्त्रार्थत्वस्वीकार इति भावः।

सञ्ज० "इति रामानुजीयाः। यच्च सम्प्रदायत्वावान्तरधर्मविषयको विभाजकतावच्छेदकावलम्बीति वाक्य-प्रबन्धेन कति-भेदा इत्यस्मत्प्रश्नस्य सम्प्रदायत्वनिष्ठ-व्यापकतानिरूपित-व्याप्यताश्रयविशिष्टधर्मविषयकत्वं विभाव्य तत्र विशेष्यस्यावगतत्वेन विशेषणमात्रविषयकजिज्ञासापरतयाऽनभिप्रेतमप्यस्माकमर्थं स्वयमुत्प्रेक्ष्य वस्तुस्वरूपे विवादाभावेऽपि वैशिष्ट्यभेदात् नानाविधा सम्प्रदाया इति रामानुजादि-नाम-निर्दर्शनपुरःसरं कतिचिद्भेदान् गणयित्वोत्तरमुक्तवन्तः, तथा, समानविषयकतामाश्रित्य केन केन वैलक्षण्येनेत्यस्मि-प्रश्नस्यैतदेवोत्तरमुक्तवन्तः, तद्योग्यमपि भवेत्। परं च परम्परागतसदुपदेशस्य द्वे इति संज्ञासंज्ञिभाववन्निर्णीतार्थकेन "आम्नायः सम्प्रदायः" इत्यादिकोशवाक्येन सर्वत्र प्रसिद्धव्यवहारेण शास्त्रीयविकल्पितार्थव्यवस्थापके शिष्ट-

व्यवहारमात्रे सम्प्रदायशब्दो न त्ववयवार्थपुरस्कारेण लोकव्यवहृतमर्थं कञ्चिदप्यवबोधयति। स चेदानीं सम्प्रदायो द्विविधो दृश्यते शास्त्रीयो लौकिकश्च। लौकिकोऽपि द्विविधः, शास्त्राविरुद्धस्तद्विरुद्धश्च। यत्र शास्त्राभ्यनुज्ञातमुभयं तत्रैकस्योभयासम्भवेनान्यतरस्मिन् शास्त्रीयबलवत्तरप्रमाणाभावेन च परम्परागतानुष्ठान-विक्षेपेऽपि प्राप्ते येन तादृशशिष्टव्यवहाराभिधेन सम्प्रदायेनात्र व्यवस्था क्रियते, सशास्त्रीयार्थव्यवस्थापकत्वात् शास्त्रीयः। शिष्टाश्च श्रुतिस्मृतिविहितकर्मकर्त्तृत्वे सति तत्फलभावनायां विशेषरहिताः *विवाहादिकर्मघटक-तैलाभ्यङ्गादिकर्मणि शास्त्राविरुद्धतत्तच्छिष्टाचारमात्रतो व्यवस्था, स शास्त्राविरुद्धलौकिकः; यत्र तु शास्त्राविषये प्रत्युत विरुद्धेऽपि निम्बार्कवल्लभप्रभृतीनां व्यवहारमात्रानुरोधेन लोकानां प्रवृत्तिर्दृश्यते न तु तत्र शास्त्रं तदतिरिक्तशिष्टव्यवहारादि वा किञ्चिदुपलभ्यते, स प्रमत्तलोकमात्रप्रवर्त्तकत्वात् शास्त्रविरुद्धे लौकिकः। तत्र शास्त्रीयस्तु "गर्भाष्टमेऽष्टमे वाब्दे" इत्यादौ शास्त्रीयार्थव्यवस्थापकतया कुलपारम्पर्य्यागतो व्यवहारो "यथा कुलम्" इत्यादिपदेनात्र तत्र प्रतिपादित एवेति न तत्राप्यव्याप्त्यतिव्याप्त्याप्रसक्तिः, नापि शास्त्राविरुद्धलौकिके, किन्तु शास्त्रविरुद्धलौकिक एव, स च यद्यपि 'कलौ खलु भविष्यन्ति चत्वारः सम्प्रदायिनः' इत्यादिना सम्प्रदायिभिः स्वकल्पितवचनेन शिष्टजनप्रतारणाय कल्पितभविष्यपुराणीयत्वकेन तत्तद्ग्रन्थेषु सामान्यतः प्रतिपादित एव। तथा 'चत्वारः सम्प्रदायिनः' इति वचनेन मुख्यसम्प्रदायिनां

चतुष्टयस्यावगततया तद्विशेषणीभूता मुख्याः सम्प्रदाया अपि चत्वार एव वा, तेभ्यः सादृश्यादिगुणयोगेन गौणभावमापन्ना मुख्या एव वाऽन्येऽपि केचन सन्ति न वा? सन्ति चेत्ते कियन्तः? इति प्रवर्त्तकभेदेन तादृशसम्प्रदायगत-भेदसङ्ख्या-परिमाणविषयिणी विशेषेण जिज्ञासा, का सङ्ख्या येषामिति विगृहीतार्थप्रतिपादक-कतिशब्देन व्यक्तीकृता 'कतिभेदा इत्यत्र' इति।

व्या० यचेत्यादि विभाव्येत्यन्तं "न बुद्धमित्येव च बुद्धिसाध्यम्" इति न्यायं स्मारयति, सम्प्रदायत्वनिष्ठव्यापकता-निरूपित-व्याप्यताश्रयविशिष्ट-धर्मविषयकं नास्माभिर्विभावितम्। स धर्मो यदि रामानुजीयत्वादिविशिष्ट-सम्प्रदायत्वं भवेत्, तदास्योत्तर-मपि रामानुजीयः शाङ्करीय इति भवितुमर्हति, न तु प्रतितन्त्रार्था अनेकविधा इति सम्प्रदायत्वावान्तरधर्मपर्य्याप्त-सङ्ख्यानिष्ठसङ्ख्यात्वन्यूनवृत्तिधर्मबोधकम्। यत्रोद्देश्यतावच्छेदके किंपदार्थस्याऽभेदेनान्वयस्तत्र तदन्वयितावच्छेदकधर्मावच्छिन्न-विशेषणतापन्न-किंपदार्थान्वयितावच्छेदक-धर्मन्यूनवृत्ति-धर्माव-च्छिन्नोद्देश्यतावच्छेदकताक-प्रकृतविधेयज्ञानगोचरेच्छायाः किं-पदार्थत्वमिति नियममभिदधता सम्प्रदायत्वावान्तर-धर्म-पर्य्याप्त-सङ्ख्यावृत्ति-सङ्ख्यात्वावान्तरधर्म-जिज्ञासाघटितोऽर्थः ता-दृशप्रश्नवाक्येन बोध्यत इति विभाव्य तदनुकूलमुत्तरमभिहि-तम्। तच्छ्रीमद्भिर्मावधारितमिति।

तत्र, 'विशेषस्य' इत्यादि 'अनभिप्रेतमप्यर्थं स्वप्रमुत्प्रेक्षे-

त्यन्तं न सम्यक्, विशेष्यीभूत-सङ्ख्याया अवगतिरस्त्येव भवताम्; अतएव सम्प्रदायत्वावान्तरधर्मे काचन सङ्ख्यास्ति, सा च केति ज्ञातुं प्रवृत्तैः 'कतिभेदाः' इति प्रश्नः कृतः इति स्वाभिप्रायमप्यजानतां पराभिप्रायवेदने का प्रत्याशा श्रीमताम्।?

तथा 'समानविषयकतामाश्राय' इत्यादि 'उक्तवन्तः' इत्यन्तं न सम्यक्, न हि प्रश्नयोर्विषयस्य समानत्वेऽप्युत्तरमेकमेव भवितुमर्हति को वह्निमान्, केन वह्निर्जन्यते इति प्रश्नयोर्वह्निरूपविषयसाम्येऽपि तयोरेकमुत्तरं कथं भवेत्? तदीययावद्विषयविषयकत्वं च प्रकृतप्रश्नयोरपि नास्त्येव। प्रथमे सङ्ख्यात्वावान्तरधर्मस्य, तृतीये तादृशभेदज्ञापकधर्मस्य जिज्ञासितत्वात्। अयमर्थः तृतीयप्रश्नोत्तरविवरणे स्पष्टीभविष्यति।

'तद्योग्यमपि भवेत्' इत्यत्र अपिशब्दोऽभिन्नक्रमो विशेष्यसमुच्चायको वा, अथवा यथाक्रमो विशेषणसमुच्चायकः।? आद्ये तत्खण्डनमित्यसङ्गतम्। द्वितीये विरोधिद्वयस्यैकत्र समावेशप्रसङ्गः।

'परं च' इत्यादिकमविचारित-रमणीयं, 'संज्ञासंज्ञिभावनिर्णयार्थं प्रवृत्त "आम्नायः सम्प्रदायः" इति कोशोऽनुष्ठापकशास्त्रस्य सम्प्रदायशब्दार्थत्वं ब्रूते, तच्च सम्प्रदायशब्दस्यास्मदुक्तार्थकत्वे एव सम्भवति, शास्त्रस्य गुरूपदेशगम्यत्वात्। न हि भवदुक्तव्यवहार आम्नायशब्दार्थतया प्रसिद्धः। सर्वत्र प्रसिद्धव्यवहारेणेत्यत्र पामरव्यवहारो विवक्षितः? उत शिष्टव्यवहारः? नाद्यः, हस्तिनि प्रयुज्यमानस्यापि पीलुशब्दस्यार्थप्रयोगमादाय

दृष्टविशेषपरतया मीमांसकैर्निर्णीतत्वात् । न द्वितीयः, तस्यास्म-
दनुकूलत्वात्, तच्च न्यायादिग्रन्थेष्वित्यादिपङ्क्तिव्याख्यानेऽभि-
हितम् ।

शास्त्रीयविकल्पितार्थव्यवस्थापकत्वं मीमांसाकल्पसूत्राणां ;
मीमांसायां हि "अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे
षोडशिनं गृह्णाति" इत्यादिशास्त्रविकल्पित षोडशिग्रहणाग्रह-
णयोर्द्व्यलाभतदपचारपरतया व्यवस्था कृता । गृह्ये शिरो-
मुण्डनतदभावादिविकल्पस्य शाखाभेदेन व्यवस्था कृता, एवं
कल्पेऽपि । धर्मज्ञसमयः प्रमाणं वेदाश्च ; "आचारश्चापि साधू-
नाम्" इत्यादिस्मृतयश्च शास्त्रविहितेऽपि धर्मे शिष्टाचारसंवादो-
ऽस्ति चेत् सोऽनुष्ठेयो नान्यथेति ब्रुवते । अत एवातिथिपूजनाय
मधुपर्के विहितमपि शास्त्रेण गवालम्भनं शिष्टाचाराभावादिदानीं
नानुष्ठीयते, शास्त्रेणार्थव्यवस्थायां शिष्टव्यवहारः, शिष्टव्यवहारेण
च शास्त्रार्थव्यवस्थेति परस्पराश्रयश्च । सम्प्रदायशब्दो शिष्टव्यव-
हारमात्रे रूढो न त्ववयवार्थपुरस्कारेण लोकव्यवहृतमर्थं
कञ्चिदप्यवबोधयतीति महदसमञ्जसं, शास्त्रीयविकल्पितार्थ-
व्यवस्थापके शिष्टव्यवहारमात्रे सम्प्रदायशब्दस्य रूढिमङ्गीकरोषि,
"स च व्यवहारस्त्रिविधः" इत्युक्त्वा तन्मध्ये शास्त्रविरुद्धव्यवहार-
मपि गणयसि । किं च क्वचिदर्थे रूढस्यापि पङ्कजादिपदस्याव-
यवार्थपुरस्कारेणापि तदर्थबोधकत्वं दृष्टमेव, कथमन्यथा शब्दस्य
शक्त्या चातुर्विध्यं तान्त्रिकैरुक्तमुपपद्यताम् ।

किं च भवदुक्तप्रकारेण त्रैविध्यमापन्ने व्यवहारे यदि सम्प्रदाय-

शब्दस्य रूढ़िस्तदा किमत्र प्रवृत्तिनिमित्तं ? न तावद्व्यवहारक-मात्रम्, अतिप्रसक्तत्वात्। नापि तत्तद्व्यक्तित्वम्, अव्यापकत्वात्। न च तावदन्यतमत्वं प्रवृत्तिनिमित्त-लक्षणानाक्रान्तत्वात्; तल्लक्षणं हि शक्यत्वे सति शक्यवृत्तित्वे सति शक्यधीनशक्यज्ञानप्रकारत्वम्। विशेषणप्रयोजनं प्रकाशे वर्द्धमानोपाध्यायैरुक्तमनुसन्धेयम्।

न चातिप्रसक्तमपि व्यवहारत्वमेव प्रवृत्तिनिमित्तं, तावदन्यतमत्वं प्रयोगोपाधिरास्तामिति वाच्यं, तथा सति धेनुशब्दस्य गोत्वमात्रं वलीवर्दादिसाधारणं प्रवृत्तिनिमित्तं, वत्सकर्तृकधानकर्मत्वं प्रयोगोपाधिरित्यङ्गीकारे वलीवर्दादौ तत्पदप्रयोगवारणसम्भवेन तत्पदप्रवृत्तिनिमित्तान्वेषण-प्रयासस्य ग्रन्थकृतामसङ्गत्यापत्तिः।

किं च तस्य केवलरूढ़त्वे "सम्प्रदीयते गुरुणा शिष्यायेति सम्प्रदायो वेदः" इति प्रकाशविरोधापत्तिः। न चोद्भिदादिपदवद् यौगिकरूढ़ोऽयं शब्द इति वाच्यं, भवदभिहितप्रश्नवाक्ये केवलरूढ़ार्थतात्पर्य्य-ग्राहक-प्रकरण-पदसमभिव्याहाराद्यभावेन अर्थविशेषनिर्णयासम्भवात्, उपरितनग्रन्थसन्दर्भस्याप्युक्तरीत्याऽन्यार्थसाधारणत्वात्। "उद्भिदा यजेत" "उद्भिदं छिनत्ति" इत्यादौ तु यजति-च्छिनत्ति-समभिव्याहारोऽर्थविशेषपरत्वग्राहकः। न च व्यवहारविभागे प्रथमोपात्तव्यवहारासाधारणो धर्मः प्रवृत्तिनिमित्तं, अन्ययोस्तु सत्प्रवृत्तिव्यवहारत्वसम्बन्धरूप-लक्षणया बोध इति वाच्यं; शब्दस्य किन्त्व

व्यापारापत्तेः ; तथाच "सकृदुच्चरितः शब्दः सकृदेवार्थं गमयति" इति न्यायविरोधः।

किं च देशविशेषसम्बन्धावच्छिन्नप्रवाह-तत्तीर-मत्स्य-शैवालाद्यभिप्रायेण 'यमुनाः कति ? इति प्रामाणिकानामपि प्रश्नापत्तिः, तदुत्तरस्यापि यमुनाश्चत्वार इत्यस्यापत्तिः।

ननु केनापि भस्तु सम्प्रदायशब्देनात्र मदुक्तव्यवहारो विवक्षितः, तस्यैवोत्तरं देयं, तदभावो तव दूषणमेवेति चेत्, न, 'नरस्य कति पादाः' इति केनचित् पृष्टो 'मनुष्यस्य द्वौ पादौ' इत्युत्तरं वदति चेत्तस्योपरि नेदं दूषणं, यत् मनुष्यशब्देन पशुर्विवक्षितः, तस्य कथं द्वौ पादौ चतुष्पदस्येति, प्रत्युत प्रष्टुरेवावाचक-पदप्रयोगरूपं निग्रहस्थानम्।

"किं च चत्वारः सम्प्रदायिनः" इति वचनार्थमाक्षेप्तुं प्रवृत्तानां भवताम् उक्तव्यवहाररूपसम्प्रदायगोचरप्रश्नवाक्यं, मथुरायाः काशीं जिगमिषतः काश्मीरपथप्रमाणलिङ्गादि-प्रश्नवदुपहास्यम्। तद्वचनगतसम्प्रदायशब्दोऽस्मदुक्तार्थ इति स्पष्टीभविष्यति।

न चेदानीमित्यादिकमसङ्गतमनुपपन्नं च, इदानीमित्यनेन प्राक्कालस्योत्तरकालस्य वा व्यावृत्तिर्नोपपद्यते, प्राक्काले तदभावे तदा किमादाय तादृशभवदभिमतव्यवस्था तत्कालवृत्तिभिः कृता भवेत् ? तेषां बहुज्ञत्वात् विनापि व्यवहारं व्यवस्था ज्ञायत इति चेत्, तर्हि तदुपदेशपरम्परयैवानुष्ठानव्यवस्था भवतीति किं तादृशव्यवहाराधीन-व्यवस्थानिर्बन्धेन ? अतिघोरकल्पात्मकोत्त-

त्कालस्थायित्वार्थं तदिति चेत्, तर्हि प्रलयकालस्थायित्वार्थम्-इदानीं पृथिवी द्विविधेत्यादि-वाक्यप्रयोगापत्तिः ।

"यत्र शास्त्राऽभ्यनुज्ञातमुभयम्" इत्यादि "शास्त्रीयः" इत्यन्तम् न विचारसहम्, अविरुद्धोभयाभ्यनुज्ञानेऽनुष्ठानविक्षेपाप्रसक्तेः, विरुद्धोभयाभ्यनुज्ञाने मीमांसयैवाधिकारिभेदेनाऽन्येन वा केन-चित्तद्व्यवस्थायाः कर्त्तव्यत्वात् । "व्रीहिभिर्यजेत" "यवैर्यजेत" इत्यादौ एकत्र पक्षपातिप्रमाणाभावस्थले द्रव्यापचारनिमित्तको विकल्पः व्यवस्थापितः ।

परम्परागतानुष्ठानविक्षेपे प्राप्ते शिष्टव्यवहारेण व्यवस्था क्रियत इति कथं सम्भवति ? अत्र व्यवहारशब्देन शिष्टकृतशब्द-प्रयोगविवक्षायां "शास्त्राविरुद्धतत्तच्छिष्टाचारमात्रतः" इत्यपि-मग्रन्थविरोधः । तत्रापि आचर्य्यतेऽनेनेति करणव्युत्पत्त्या आचारशब्दो व्यवहारपर इति न सम्भवति, "वेदोऽखिलो धर्ममूलम्" इत्यादिस्मृतौ स्मृतिसमभिव्याहृताचारशब्देनानुष्ठान-रूपाचारस्यैव वेदार्थसंवादित्वेन धर्ममूलत्वाभिधानात् । स्मृतौ तत्पदस्यानुष्ठानपरत्वेऽपि प्रकृते शब्दप्रयोगरूपव्यवहारपरत्व-मिति चेत् ? तत्र शास्त्रीयस्तु कुलपारम्पर्य्यागतो "व्यवहारो यथा-कुलम्" इत्यादिपदैस्तत्र-तत्र प्रतिपादित एवेत्यपिमग्रन्थविरोधः । अनुष्ठानस्यैव 'यथाकुलम्' इति वैलक्षण्याभिधानात् । अनु-ष्ठानविवक्षायां तु परम्परागतानुष्ठानविक्षेपेऽपि प्राप्तेऽनुष्ठानेन व्यवस्था क्रियते इत्यप्ययुक्तं स्यात् । तत् न सम्भवति, कुलपरम्प-रागतमनुष्ठानं शिष्टाचार एव, तस्यैव कुलपरम्परान्तर्गत-

तत्तत्पुरुषानुष्ठेयत्वात् । न चातिरिक्तः कश्चन तृतीयो व्यवहार-स्तादृशो दृश्यते स्मर्य्यते वा ।

शिष्टाश्चेत्यादि न सत्, श्रुतिस्मृतिविहितकर्मकर्तृत्वे सति फलभावनायां विक्षेपरहितत्वं प्रथमं शिष्टस्य, पश्चात् कुत्सुकृति-प्रयुक्ताशिष्टतादशायामतिप्रसक्तं, कदाचित् तादृशकर्मकर्तृत्वात् । सर्वदा तत्कर्तृत्वं च कर्मायोग्यतासमये तदभावादसम्भवि । किं च श्रुतिस्मृतिविहित-यावत्कर्मकर्तृत्वं वा यत्किञ्चित्-कर्मकर्तृत्वं वा ? न प्रथमः, इदानीं कुत्रापि तददर्शनात् । न द्वितीयः, स्मार्त्तयत्किञ्चित्स्नानाचमनादिकर्मकर्तृणामप्य-शिष्टानां तत्त्वापत्तेः । न च तेषु विशेष्यदलं नास्तीति वाच्यं, फलाभिसन्धिं विना कर्मकर्तृणामपि शिष्टानामतत्त्वापत्तेः । न च तेषां क्षुद्रफलेष्वभिसन्धिविरहेऽपि "तमेवं वेदानुवचनेन" इत्यादिश्रुत्युक्तज्ञानोपासनादि-कर्मफलेऽभिसन्धिरस्त्येवेति वाच्यं, परिनिष्पन्नज्ञानानां लोकसंग्रहार्थं कर्म कुर्वतां तदभावात् । न च लोकसंग्रहः फलं, भावनायास्तदर्थत्वाभावात्, अन्यथा नान्तरीयकदुःखस्यापि भावनाफलत्वापत्तेः ।

विवाहादीत्यादि-द्वितीयाचारनिरूपण-वाक्ये शास्त्रावि-रुद्धेति व्यर्थं, तद्वारणीयदोषस्य शिष्टीयत्वविशेषणेनैव वारणात् ।

यत्र तु शास्त्राविषय इत्यादितृतीयव्यवहारनिरूपणमप्य-समीचीनं, निम्बार्कवल्लभाचार्य्यप्रभृति-शिष्टायमणव्यवहारविष-याणां भगवन्नामसङ्कीर्त्तन-तन्मन्त्रजप-तुलसीमालाधारण-भग-

वदर्शन-तत्प्रसादोपजीवनादीनां शास्त्राविरुद्धत्वात्, प्रत्युत शास्त्रतात्पर्य्यपर्य्यवसानभूमित्वात्।

“व्यवहारमात्रानुरोधेन लोकानां प्रवृत्तिर्दृश्यते, न तु तत्र शास्त्रं, तदतिरिक्तशिष्टव्यवहारादि वा” इत्यादिकमप्यनवसरम्, अनुपदमुक्ततत्तद्व्यवहारेषु श्रुतितदुपबृंहणस्मृतीतिहासपुराणपञ्चरात्रादिषु बहुतरप्रमाणोपलब्धेः।

किं च स्ववाग्विरोधमपि न जानन्ति भवन्तः? प्रथमं शास्त्राविषय इत्यादिना तेषामशिष्टत्वमभिधायेदानीं तदतिरिक्तशिष्टव्यवहारादीत्यत्र तेषां शिष्टत्वमङ्गीकृत्य तदतिरिक्तेति विशेषणमुपात्तम्।

किं च सामान्याचारो विशेषाचारश्च शास्त्रेषु प्रतिपाद्यते, सामान्याचारस्तत्तद्वर्णाश्रमनिष्ठाः पुरुषसामान्यानुष्ठेयाः सन्ध्यावन्दन-पञ्चमहायज्ञादिव्यवहाराः; विशेषव्यवहाराः तत्तदाचार्य्यैः श्रुतिस्मृत्यादिप्रामाण्याविरोधेनानुष्ठिताः स्वस्वशिष्याणामुपदिष्टा भगवदर्चनादिव्यवहाराः; ते च तत्तदाचार्य्योपदेशानुरोधेन तत्तच्छिष्यपरम्परान्तर्गतपुरुषैरेवानुष्ठीयन्ते इति तदतिरिक्तशिष्टव्यवहाराभावेऽपि न तेऽप्रामाणिकाः, न च ते प्रमत्तलोकप्रवर्त्तकाः, तत्र प्रवृत्तानामत्यवस्थितत्वात्; प्रमत्तप्रचरितशास्त्रं तदाचारश्च खलु प्रमत्तलोकप्रवर्त्तकः, किन्तु शास्त्रविरुद्धे लौकिक एवेति यथोपनयनादिसामान्याचारप्रतिपादकशास्त्रेषु गृह्यादिषु शास्त्राविरुद्धलौकिकाचारनिर्णायकेषु पूर्वमीमांसाप्रथमाध्यायीय-होलाकाधिकरणादिषु परिश्रमः कृत-

यथा वैष्णवधर्मप्रतिपादकमेतदपर्य्याप्तं ग्रन्थेषु सुलुपलब्धिरस्तीति-व्यासपुराणपञ्चरात्रेषु परिश्रमः कर्त्तव्यः श्रीमद्भिस्तदा चित्तथापि जिज्ञासाया न प्रवृत्तिः। यथा हिरण्यनिधिमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तोऽपि न जानन्ति, तथा शास्त्रपरिशीलनप्रसृतबुद्धयोऽपि द्वेषादज्ञानाद्वाऽत्यन्तापरिदृष्टशास्त्रप्रतिपाद्यं न जानन्त्येव, किं च यदि तादृशाचाराभिप्रायकोऽयं प्रश्नस्तदा तद्बोधकशब्दघटितं शास्त्रविरुद्धस्य सम्प्रदायस्य कति भेदाः? इति प्रश्नवाक्यं प्रयोक्तव्यम्। किं च 'कलौ खलु' इत्यादिवचनमधीयानैः शास्त्रविरुद्धसम्प्रदायस्य सञ्ज्ञां विशेषरूपेण जानद्भिरपि कथं स प्रश्नः कृतः? उदाहृतवचने सम्प्रदायशब्दो न सम्प्रदायसामान्यपरोऽपि तु वैष्णवसम्प्रदायात्मक-तद्विशेषपरः, स्वस्वाचार्य्यपरम्परोपदिष्टवैष्णवधर्मानेव स्वाभिमतमोक्षसाधनतयाऽनुतिष्ठन्तस्तत्कारः इत्यर्थः। कृतादिषु मोक्षसाधनतया कर्मज्ञानभक्तीः कुर्वते। तेषां तदुपयोगिविद्यासामर्थ्ययोः सत्त्वात्।' कलौ तु प्रायशस्तादृशविद्यासामर्थ्याभावाद् वैष्णवशास्त्र-प्रतिपादितानेव धर्मान् मोक्षार्थमनुतिष्ठन्तीति कलिशब्दाभिप्रायः। अत एव नास्मदुक्तस्य 'कति भेदाः? इति प्रश्नोत्तरस्य व्याघातः।

ननु भवदुक्तभगवद्भजनादिव्यापाराणां शास्त्रसिद्धत्वेऽपि शास्त्रविरुद्धा अपि केचनाचारास्तैरनुष्ठीयन्ते इति ते कथं शिष्टा भवेयुः? इति चेत्, यदि कश्चनाचारस्तादृशस्तदनुयायिषु दृश्यते, न स गुरुपरम्परोपदेशप्राप्तः, तद्वन्येषु तत्कार्य्यता-

प्रतिपादक-वाक्याभावात् तच्छिष्यपरम्परासु कश्चित् स्वीय-दुष्कर्मपरिपाकवशेन शास्त्रविरुद्धमपि किञ्चिदनुतिष्ठेत्; तेन न तद्गुरूणामशिष्टत्वम्। अन्यथा शाक्तेषु कश्चित् शास्त्रविप्रति-षिद्धमगम्यागमन-मदिरापानाद्यशिष्टमांसभक्षणादिकं पापकर्म करोति चेत्, किं तदा शाक्तागमाचार्यस्याशिष्टत्वापत्तिः ?।

स्वकल्पितेत्यादिकमपि केवलाग्रहविजृम्भितं, भवद्गृहस्थ-भविष्यपुराणपुस्तकेषु तद्वचनं न दृश्यते चेत्? तददर्शनं, न तत्कल्पितत्वेऽव्यभिचारिलिङ्गम्, भवतु तत्कल्पितत्वे भवादृशा-ग्रहिभिर्वैतत्लेखकैर्लेखावसरे परित्यागेऽपि तुल्यत्वात्; तद्-गृहस्थ-कोशेषु दृश्यत एव तद्वचनम्।

तथा 'चत्वारः सम्प्रदायिनः' इति वचनेनेत्यादिविकल्पोऽप्य-नुत्थितिपराहतः, तद्वचने वैष्णवसम्प्रदायस्यैव चातुर्विध्योक्तेः; तेभ्योऽन्येषामपि शङ्कर-यादव-मीमांसान्यायाचार्यादृष्टानां तेषा-मुपलभ्यमानत्वात्, अस्मदुक्तसम्प्रदायपदस्यार्थेऽर्थतया भवदभि-मते वा गौणमुख्यविभागस्य दुर्वचत्वात्।

"सन्ति चेत्" इत्यादि "कति भेदाः इत्यत्र" इत्यत्यन्तं न समी चीनम्, 'चत्वारः' इति त्वदुदाहृतवचनेन चतुष्टयत्वरूपसङ्ख्या-त्वन्यूनवृत्ति-धर्मावच्छिन्नोद्देश्यतावच्छेदकताकेच्छाविषयविधेय-ज्ञानात्मकविषयस्य सिद्धत्वात्, सिद्धे इच्छानुदयात्; सम्प्र-दाये परिमाणस्य मध्यत्वादिः प्रश्नस्तु न सम्भवति; अस्म-दुक्ते द्रव्यगुणादिपदार्थे भवदभिमते व्यवहारे वा एकस्य तस्या-भावात्।

सङ्ख्यायामियत्ता परिमाणपदेन विवक्षितेति चेत्, सा वचनगतचतुःशब्देन ज्ञातेति न तत्र जिज्ञासा भवितुमर्हति ।

दुर्जे० "केन वैलक्षण्येन सम्मताः ? इति तृतीयः प्रश्नः । वैलक्षण्यमसाधारणो धर्मः, प्रयोजकत्वरूपं कारणत्वं ज्ञापकत्वपर्य्यवसायी तृतीयार्थः ; तस्य सम्मता इत्यत्रान्वयः ; तथाचावान्तरभेदस्य परस्परव्यावृत्तधर्म-प्रयोज्यत्वात् तादृशभेदप्रयोजकासाधारणधर्मविषयिणी जिज्ञासा, स्वविषयाभिज्ञत्वापादिका पृष्टुर्ज्ञायते । तत्रोत्तरम्, प्रागेव वैशिष्ट्यविशेषस्य, समानार्थेषु भेदप्रयोजकतया, 'यद्यपि' इत्यादिग्रन्थोत्तरतयाऽभिहितस्य विभागप्रयोजकत्वमिति ।" इति ।

टी० प्रश्नवाक्ये भेदा इत्यनुषज्यते, तदर्थोऽत्रोद्देश्यः, तत्र तृतीयार्थस्यान्वयः, तत्र प्रकृत्यर्थस्य, तत्र चोद्देश्यतावच्छेदके किंपदार्थस्याभेदेनान्वयः, स च प्रकृतेऽसाधारणधर्मत्वन्यूनवृत्तिर्योऽसाधारण-धर्मत्वावच्छिन्न-विशेषणतापन्नो धर्मस्तदवच्छिन्नोद्देश्यतावच्छेदकताक-प्रकृतविधेय-ज्ञानगोचरेच्छाघटितः ; तथाचासाधारणधर्मत्वावान्तरधर्मप्रकारकजिज्ञासाविषयाभिन्नासाधारणधर्मज्ञापककाः सम्प्रदायभेदाः सम्मता इति वाक्यार्थः । तदिदमुच्यते, वैलक्षण्यमित्यादिना ; प्रयोजकत्वरूपं कारणत्वमित्यादि प्राचीनमताभिप्रायेण ; वृत्त्यनियामकस्याभावप्रतियोगितावच्छेदकत्वमनङ्गीकुर्वतां नव्यानां मते ज्ञाप्यत्वपर्य्यवसायि प्रयोज्यत्वं तदर्थः । भेदो ह्यसाधारणो धर्मः, सिद्धान्तेऽसाधारणधर्मातिरिक्तभेदानभ्युपगमात् कथमेकस्य ज्ञापकत्वं ज्ञाप्यं च? को

दोषः? भूतलं द्रव्यवत् घटादित्यादौ तद्दर्शनात्, एकरूपेण तु ते एकस्य न सम्भवतः, सिद्धसाधनप्रसङ्गात् ; यद्वाऽसाधारणधर्मान्तरेण तज्ज्ञापनं भवत्विति न कोऽपि दोषः। 'तस्य' तृतीयार्थस्य, 'सम्मता' इत्यत्रेति संपूर्वकमनधात्वर्थावधारणनिरूपितविषयत्वे निष्ठार्थे सामानाधिकरण्येनान्वयः। तथाच तादृशासाधारणधर्मनिष्ठज्ञापकता-प्रतियोगिक-ज्ञाप्यताप्रयुक्तावधारण-विषयतावन्तो भेदा इति पर्य्यवसितम्। 'घटवत् पटवद्भूतलमित्यादौ घटस्य सामानाधिकरण्येन पटे विशेषणविवक्षायां मतुप्प्रत्ययस्याकाङ्क्षाग्राहकत्वम्' इति मणिकारमते घटपदार्थस्य पटपदार्थे सामानाधिकरण्यसम्बन्धेनान्वयो दृश्यते। वस्तुतस्तु ज्ञानजन्यत्वं तृतीयार्थः, तदर्थैकदेशे ज्ञाने प्रकृत्यर्थस्यान्वयः, जन्यत्वस्य सम्मतिशब्दार्थैकदेशे ज्ञानेऽन्वयः।

'अवान्तरभेदस्य' अवान्तरधर्मरूपसजातीयभेदस्य, 'परस्परव्यावृत्तधर्मप्रयोज्यत्वात्' तत्तदसाधारणधर्मज्ञानज्ञाप्यत्वात्। तादृशेत्यादि, तादृशभेदज्ञापकासाधारणधर्मत्वन्यूनवृत्तिधर्मपुरस्कारेण तादृशधर्मविषयक-ज्ञानगोचरेच्छा स्वविषयासिद्धत्वानुमापिका। 'प्रागेव' प्रथमप्रश्नोत्तरव्याख्यानावसरे। 'वैशिष्ट्यविशेषस्य' परस्पर-व्यावृत्तासाधारण-धर्मप्रतियोगिक-सम्बन्धविशेषस्य। 'समानार्थेषु' एकजातीयविशेषेषु।

सञ्ज॰ "इति रामानुजीयाः, केन केन वैलक्षण्येनेत्येतत्प्रश्नतात्पर्य्यविषयीभूततादृशशास्त्रीयसम्प्रदायगततादृशभेदविषयकसम्मतिप्रयोजकतत्तदसाधारणधर्मविषयक-जिज्ञासाया निवृत्ति-

र्थेन भवेत् तदुत्तरं भवता वाच्यम्। न हि वैशिष्ट्यविशेषणेत्येतावन्मात्रेण तादृशजिज्ञासाया निवृत्तिर्भवतीति, तस्मात् पुनरपि समाहित-मनसा परिश्रम-मनादृत्याऽस्मदभिप्रायानुसारेणोत्तरं विभावयन्त्विति तत्खण्डनम्" इति।

व्यामो० केन वैलक्षण्येनेत्यादिप्रश्नवाक्यलक्ष्यार्थस्यानुरूपमुत्तरमस्माभिर्दत्तम्। तत् श्रीमद्भिः सम्यक् नावधारितम्। अतएवान्यथैव खण्डनवाचोच्यते, केनचित्, को घटः? इति प्रश्ने कृतेऽन्येन कम्बुग्रीवादिमान् घट इति सम्यगुत्तरं दीयते, तथा कति गुणाः? इति प्रश्ने कृते चतुर्विंशतिर्गुणा इति तस्योत्तरं दीयते। ननु मया पशुतात्पर्य्येण घटशब्दः प्रयुक्त एवंरूपगुणतात्पर्य्येण गुणशब्दः प्रयुक्तः, तत्रास्मत्तात्पर्य्यानुसारेणोत्तरं भवता न दत्तमिति सभायां प्रष्टा वदति चेत्, तं सभ्या न बहुमन्यते। ननु सभ्या हृष्यन्तु कुप्यन्तु वा, प्रधानप्रश्ने सम्प्रदायपदेनाशास्त्रीयसम्प्रदाय एव विवक्षितः। तस्यैव विशेषजिज्ञासा कृता। प्रथमावान्तरप्रश्नेन तद्भेदज्ञापकप्रश्न एव तृतीयोऽपि; तस्यैव भवतोत्तरं देयमिति चेत्? शृण्वन्तु। प्रथमं सम्प्रदायशब्दस्यास्मदभिमतार्थः कः? इति प्रष्टव्यम्। तस्योत्तरमपि भवतैव वा सर्वज्ञेन वा देयम्। तत्रापि नायमस्मदभिमत इति प्रतारणा कर्तुं शक्यते, भवद्भिः, अशास्त्रीयसम्प्रदायस्य कति भेदाः? इति द्वितीयः प्रश्नः कर्त्तव्यः। तत्र प्रथमावान्तरप्रश्नस्येदमुत्तरम्,—श्वा-म्लेच्छ-पुक्कस-पतितब्राह्मण-पाराशर-माध्वादिशब्दकवचितपर्य्यन्तमशास्त्रीया व्यवहारा बहव इति। तृतीयप्रश्नस्य

च प्रागुक्तमेवोत्तरं, तद्विशेषाणामसाधारणधर्मशाप्यत्वात्, किन्तु सज्जनमनोऽनुरञ्जनीयः शास्त्रीय-शास्त्राविरुद्धलौकिक-तद्विरुद्ध-लौकिकव्यवहारभेदेन सम्प्रदायशब्दार्थस्य त्रैविध्यप्रतिपादको ग्रन्थो विरुध्यते, अशास्त्रीयशास्त्रविरुद्धव्यवहार-स्त्रिविधः,—सन्दिग्धशास्त्रीयार्थव्यवस्थापकः, शास्त्राविरुद्धलौकिक-स्तद्विरुद्ध-लौकिकश्चेति विभागः सम्यगपरिहरणीयः । सामान्यधर्माक्रान्तस्य हि परस्परव्यावृत्तधर्ममुखेन विभागः क्रियते। अत्र भवतैवानुपदमुक्तं,—"चत्वारः सम्प्रदायिनः इति-वचनोक्ताशास्त्रीयसम्प्रदायगत-प्रवर्त्तकभेदप्रयुक्तभेदसङ्ख्या-परिमाणविषयिणी विशेषेण जिज्ञासा" इति, "तादृशाशास्त्रीय-सम्प्रदायगत-तादृशभेदविषयकसम्मतिप्रयोजक-तत्तदसाधारणधर्मविषयकजिज्ञासाया येन निवृत्तिर्भवेत्" इति च ।

एतावता हि सम्प्रदायविषयकः प्रश्नः सर्वोऽपि अशास्त्रीय-सम्प्रदायगोचर इति ज्ञायते। किं चाशास्त्रीयव्यवहारभेदानां सङ्ख्याप्रयोजकः प्रश्नः, 'कम्बले कति रोमाणि मेषस्याण्डं कियत्पलम्?' इति प्रश्नवदुपहास्यः ।

दुर्ज० "कस्मै प्रयोजनाय इति प्रयोजनावलम्बी द्वितीयः प्रश्नः । तत्रेदमुत्तरं, न हि कोऽप्याचार्य्यो मोक्षादन्यत्प्रयोजनमुद्दिश्य सम्प्रदायं प्रावर्त्तयत्, अतो यथायोग्यं स्वरूपसतो ज्ञातस्य च सम्प्रदायस्य मोक्ष एव प्रयोजनतयाऽभिसंहितः । यद्यपि मोक्षे प्रयोजनत्वाभिसन्धिः क्वचित् क्वचित् सम्प्रदाये नास्ति, तथापि तत्प्रतिपादकशास्त्रे परमप्रयोजनतयाऽभिसंहितं

फलमेव तच्चोद्दिष्टम् । परन्तु, सर्वेषां सम्प्रदायानां मोक्षाव्यभिचारोऽस्ति न वा ? इत्यन्यदेतत्, न तत्र पर्य्यनुयोगः अतोऽतस्तदुत्तरादपि विरम्यते" इति ।

टी० अत्रापि प्रश्नवाक्ये प्रयोजनत्वावच्छिन्नविशेषणतापन्नो यः प्रयोजनत्वन्यूनवृत्तिर्धर्मस्तदवच्छिन्नप्रयोजननिष्ठोद्देश्यतावच्छेदकताकाध्याहृत-भवन्ति-पदार्थ-सत्तारूप प्रकृतविधेयविषयकज्ञानेच्छाघतिटवाक्यार्थबोधः प्रयोजनत्वन्यूनवृत्तिधर्मजिज्ञासा-विषयाभिन्नप्रयोजनफलक-सम्प्रदायभेदा भवन्तीत्याकारः । तादृशार्थमेवाह,—प्रयोजनावलम्बीति, विशेषधर्मपुरस्कारेण प्रयोजनजिज्ञासाघटितार्थबोधजनकं प्रश्नवाक्यमित्यर्थः । यद्वा प्रयोजनत्वावान्तरधर्मपुरस्कारेण प्रयोजनघटितवाक्यार्थज्ञाननिवर्त्यजिज्ञासाघटितवाक्यार्थज्ञानजनकमित्यर्थः ।

न हि कोऽपीत्यादि,

"आचिनोति हि शास्त्रार्थानाचारे स्थापयिष्यति ।
स्वयमाचरते यस्मादाचार्य्यः परिकीर्त्तितः ॥"

इत्याद्युक्ताचार्य्यलक्षणाक्रान्तः कोऽपि सर्वशास्त्रविचारजन्याधममध्यमोत्तमसकलप्रयोजन-तदुपायसम्यग्ज्ञानवान् न परमप्रयोजनं विहाय क्षुद्रप्रयोजनमभिलषन् तदुपायमनुतिष्ठेत्, न वा शिष्यं तदुपायानुष्ठाने स्थापयेत् इत्याचार्य्यपदाभिप्रायः । तमेवाह,—मोक्षादन्यदित्यादिना । न्यायमीमांसादिसम्प्रदायानां मोक्षार्थं प्रवृत्तिरिति कथमुपपद्यतां ? गौतमेन हि प्रथममेव यथायथं "तत्त्वज्ञानान्निःश्रेयसाधिगमः" इति कण्ठत उक्तम् ।

मीमांसाया अपि नित्यसुखाभिव्यक्तिरूपमोक्षोपयोगः अभिप्रेतः। कर्मणोऽन्यस्य तादृशमोक्षोपायस्य मीमांसकैरनिरूपणात्, स चोपायः वेदान्तार्थनिर्णयद्वारेति,

"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
पुराणं धर्मशास्त्रं चेत्येता विद्याश्चतुर्दश॥"

इति वचनेन प्रतिपादितः। किं बहुना, कामशास्त्रस्यापि हि मोक्षः प्रयोजनमित्याह,—भगवान् वात्स्यायनः,—"कामशास्त्रोक्तप्रक्रियया काममवने हि तत्रालम्बुद्धिर्जिहासा मोक्षे प्रावीण्यं च पुरुषाणां भवति इति तदनुयायिनो व्याख्यातारः" इति। 'अतो यथायोग्यम्' इत्यादि, पदार्थानुगुणमित्यर्थः। भक्त्यादिरूपस्य प्रतितन्त्रार्थस्य स्वरूपतः, तद्विषयविभूत्यादेस्तु ज्ञातस्येति विभागः।

ननु क्वचित् प्रतितन्त्रे मोक्षहेतुत्वमुभयथापि नास्ति, तदभिधानं तु प्रवृत्तिरुच्युत्पादार्थमिति शङ्कायां, तुष्यत्विति न्यायेनाह,—यद्यपीत्यादि। परन्त्वित्यादि, 'मोक्षाव्यभिचारो' मोक्षाव्यवहितप्राग्वृत्तित्वम्। अन्यदेतदिति, स्वज्ञानाधीनप्रकृतप्रश्नवाक्यघटककिंपदार्थजिज्ञासानिवृत्तिकं यत्, तत्तदन्यदित्यर्थः। तदेवाह,—न तत्रेति।

मञ्ज० "इति रामानुजीयाः, तदसङ्गतम्, तदीयसम्प्रदायस्यैवेश्वरविभूति-त्रिपुण्ड्रधारणनिन्दा-द्विजात्यनुचित-शंखचक्राद्यङ्कनाघटिततयाऽनर्थफलातिरिक्तशास्त्रीयफलाजनकत्वस्य निश्चितत्वेन मोक्षरूपफलजनकत्वस्य दूरापास्ततया अत्रैव मोक्षव्यभिचारदर्श-

नात्। तैः सर्वदा दास्यभावस्यैवाङ्गीकारेण मोक्षोद्देश्यकं सम्प्रदायकर्म्मैकमाचार्य्यकर्तृकं प्रवर्त्तनमित्यस्य वक्तुमशक्यत्वाच्च। न च दास्यभाव एव मोक्ष इति वाच्यम्। दास्यभावस्य मोक्षत्वप्रतिपादकप्रमाणाभावात्, जीवदवस्थामुक्तावस्थयोरभेदप्रसङ्गाच्च। किञ्च तदीयसम्प्रदायस्य शूद्र-प्रवर्त्तितत्वेनाचार्य्यप्रवर्त्तितत्वाभावात्। अस्मत्प्रश्ने तादृशोत्तरस्यानुचितत्वमेव। किञ्च सर्वैराचार्य्यैर्भिन्नभिन्नरूपेण मोक्षस्य प्रयोजनत्वमभिहितं वा एकेनैव रूपेण? आद्ये सर्वेषु सम्प्रदायेषु मोक्षव्यभिचारः स्पष्ट एव। द्वितीये तत्तन्मताभेदप्रसङ्गः, फलस्यैक्येऽङ्गाङ्कनादि-सामग्रीणामकिञ्चित्करत्वात्।

किञ्च 'तत्प्रतिपादकशास्त्रे' इत्यत्र शास्त्रपदेन वास्तवश्रुतिस्मृत्यनुकूलं शास्त्रं गृह्यते, तत्प्रतिकूलं वा? नाद्यः, तत्र सम्प्रदायप्रयोजनत्वेन मोक्षाभिसन्धेः क्वाप्यभावात्। न द्वितीयः, तस्य अप्रामाण्यज्ञानानास्कन्दित-बोधजनकत्वे प्रमाणाभावेन तत्तदभिहितप्रयोजने प्रेक्षावत्प्रवृत्त्यनुपपत्तेरित्यलम् इति तत्खण्डनम्" इति।

व्यामो० 'तदसङ्गतम्' इत्यादि, व्यभिचारदर्शनादित्यन्तं, न सत्, वैष्णवाग्रेसरत्वेन सम्मतमीश्वरं को वा निन्देत्। किन्तु लोकसंमोहनार्थं तामसोपदेशे प्रवृत्तेनेश्वरेण धृतं चिह्नं लोकसम्मोहजनकं वाक्यं च मुमुक्षुभिर्नोपादेयमिति ज्ञापयितुं मोक्षधर्मप्रतिपादक-सात्त्विकपुराणादिषु निन्दा कृता। सा च न हि निन्दान्यायेन मोक्षधर्मस्तुत्यर्थेति व्यक्तीभविष्यति। शंखचक्राङ्कनं

मुमुक्षोर्द्विजातेरेकजातेश्चानन्यगतेरावश्यकं, वर्णाश्रमधर्मवदिति प्रतिपादयिष्यते। मोक्षरूपं फलं मुमुक्षूणां परमप्रयोजनमपि भवादृशानां मुक्तिविद्वेषवतामुपासित-स्वाभीष्टार्थकामफलहेतु-पुरुषार्थाणामनर्थ एव, तदतिरिक्तं शास्त्रीयं फलम्, अर्थकामौ, तद्जनकत्वं चाऽभिसन्धिविशेषवतामस्त्येवेति। मोक्षरूपफलजनकत्वस्य दूरापास्ततयेति अस्मत्सम्प्रदायग्रन्थानवलोकनप्रयुक्तं, तत्र हि अस्मत्सम्प्रदायार्थज्ञानस्य परमप्रयोजनकत्वं बहुधोपपादितम्। रुद्रसायुज्यादि-भवदभित-मोक्ष-व्यभिचारोऽस्त्येव, वास्तविकमोक्षव्यभिचारो नास्ति। "स च तमेव विद्वानमृतम् इह भवति" "तमेव विदित्वाऽतिमृत्युमेति" इति, "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा" इति श्रुतिप्रतिपन्नस्तदुपबृंहणस्मृतीतिहासपुराणपञ्चरात्रेषु विस्तरतः प्रतिपादितः।

"तैः सर्वदा दास्यभावस्यैवाङ्गीकारेण" इति, अत्रैवकारस्य दास्यभावातिरिक्त-गुणानङ्गीकारपरत्वमनुपपन्नं "स आत्माऽपहतपाप्मा विजरो विमृत्युः" इत्यादिप्रजापतिविद्याप्रतिपादितानां मोक्षदशायां "तं ब्रह्मरसः प्रविशति। तं ब्रह्मगन्धः प्रविशति" इत्यादिपर्यङ्कविद्यावाक्यप्रतिपन्नानां बहूनां अपहतपाप्मत्वादिगुणानामङ्गीकारात्।

यदि तस्य सर्वदैवेति सम्बन्धः, तदाङ्गीक्रियत एव,

"दासभूताः स्वतः सर्वे ह्यात्मानः परमात्मनः।
नान्यथा लक्षणं तेषां बन्धे मोक्षे च विद्यते॥"

इति वचनेन दासभावस्य जीवात्म-स्वाभाविकाकारत्वेन प्रति-

पादनात्। एवं मोक्षदशाप्रतिपादकश्रुतिरपि, "येन येन धाता गच्छति, तेन तेन सह गच्छति," "छाया वा सत्वमनुगच्छेत्" इत्यादिका सर्वदा दासभावे प्रमाणम्। किं च मोक्षार्थं रुद्रोपासनातदर्चनादिकं कुर्वाणा अपि भवन्तोऽन्येऽपि वा ये उपायानुष्ठानसमये स्वस्मिन् उपास्यदेवता-दास्यमङ्गीकृत्यैवार्चनादिकं कुर्वन्ति, तेषामपि तदभिमतमोक्षकाले उपायानुष्ठानकालानुसंहितो दासभाव आविर्भवत्येवेति, "यथाक्रतुरस्मिन् लोके पुरुषो भवति, तथेतः प्रेत्य भवति" इत्यादिश्रुत्युक्त-न्यायेनावगम्यते।

जीवदवस्थेत्येत्यादि, जीवनकालीनस्य गुणस्यानुवृत्तेरेव यदि तदवस्थयोरभेद आपाद्यते, तर्हि दासभावानुवृत्त्यनङ्गीकारेऽपि नित्यत्वाणुत्वज्ञानादिगुणानुवृत्त्या तत्प्रसङ्गो दुर्वार एव। किं चात्र मूलशैथिल्यं च, आपादके आपाद्यव्याप्तेरभावात्; न हि हस्तपादादि-स्थानेच्छाद्यवयव-गुणानुवृत्तिमात्रेण बाल्य-यौवन-वार्द्धकाद्यवस्थानामैक्यं दृश्यते।

किं च तदीयेत्यादिकम्, अतिबालिशभाषितम्, वेद-तदुपबृंहणनिर्णीतस्य बोधायन-टङ्क-द्रमिड़-गुहदेव-भारुचि-प्रभृतिभिर्महर्षिकुल-प्रसूतैर्जैमिन्यादि-महामीमांसक-श्रेष्ठैर्वृत्ति-ग्रन्थवाक्यभाष्यादिष्वसकृत्प्रतिपादितत्वात्, किन्तु शठकोपादिभिरस्मदाचार्य्य-परम्परान्तर्गतै-र्नाथमुन्यादीनामुपदेशैः कृत इति न तस्याचार्य्यप्रवर्त्तितत्वाभावः। अन्यथा श्रुतिप्रतिपन्नानां ब्रह्म-तदुपासन-तदङ्गानां व्यासादिपरमाचार्य्यमीमां-

षितानां धर्मव्याधेन कौशिकं प्रत्युपदेशः कृत इति व्यासादीनामपि तत्प्रवर्त्तकानामाचार्य्यत्वाभावेनाचार्य्य-पवर्त्तितत्वाभावप्रसङ्गः ।

असमञ्जसमित्यादि, शास्त्रमर्य्यादां त्यक्त्वा वितण्डामवलम्ब्य कृतस्य प्रश्नस्य, पिशाचभाषयेत्यादिन्यायमपहाय शास्त्रमर्य्यादामवलम्ब्य दत्तमुत्तरमनुचितमेव भवेत्, न हि वयमतिकष्टेऽपि शास्त्रमर्य्यादां त्यक्ष्यामः ।

किं चेत्यादिकमप्यमनोहरम्, मोक्षपदार्थस्यात्यन्तिक-सर्वोपाधिविनिर्मोकस्यैकरूपत्वात्, तं प्रति कस्यापि सम्प्रदायस्य व्यभिचाराभावात्, तादृशमोक्षानन्तरभावि-ब्रह्मानुभवे "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा" इत्युक्ते रूपे भेदोऽस्ति, व्यासाचार्य्यमीमांसितासु विद्यासु "आनन्दादयः प्रधानस्य" इति सूत्रोक्तानामानन्दादीनामनुगतत्वेऽपि संयद्वामत्वादीनां गुणविशेषाणां व्यावृत्तिदर्शनात् । तृतीयलक्षणीयगुणोपसंहारपादे गुणानुवृत्तिव्यावृत्तिविचारः सूत्रकारेणैव कृतः । एवं द्रमिड़ाचार्य्येणापि सूत्रभाष्ये, "यद्यपि सच्चित्तो न निर्भुग्नगुणगणां देवतां मनसाऽनुधावेत्तथाप्यन्तर्गुणामेव तामुपास्ते, सैव प्राप्यते" इति सद्विद्यादहरविद्ययोः फलैक्यं गुणभेदश्चाभिहितः । उपास्यगुणभेदे हि फलावस्थायामनुभाव्य-विशेषणगुणोऽपि भिद्यत एव, अन्यथा यथाक्रतुन्यायविरोधात्, अनुभाव्यभेदेनानुभवभेदो दुस्त्यजः । अतएव मोक्षस्यैकरूपत्वात् "विकल्पो विशिष्टफलत्वात्" इति सूत्रमपि सङ्गच्छते । यथाक्रतुन्यायोऽपि अयोग-

अवच्छेदार्थको न त्वन्ययोगव्यवच्छेदार्थ इति वहवस्तदा न कोऽपि दोषः। न च मोक्षस्यैकरूपत्वे सालोक्य-सामीप्यसारूप्य-सायुज्यभेदेन मुक्तेश्चातुर्विध्यमभिदधन्तः पौराणिका ऐतिहासिकाश्च कुप्येयुरिति वाच्यम्। सर्वोपाधिविनिर्मोकात्मक-मोक्षस्यैकरूपत्वेऽपि तदनन्तर-भाव्याकार-विशेषमादाय तथाप्रतिपादनोपपत्तेः, तत्रापि न कस्यापि सम्प्रदायस्य व्यभिचारः; तादृशाकारनिष्पत्तेरुपायासाध्यतया प्रतिबन्धकनिवृत्तिमात्रप्रयुक्तत्वात्। सालोक्यादिनिष्ठस्य सायुज्याद्यनवाप्तिरुपायानुष्ठानकालीन-चेतनसङ्कल्पानुरूप-भगवत्सङ्कल्पप्रयुक्ता। यद्वा "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत", ज्योतिष्टोमेन स्वर्गकामो यजेत", "विश्वजिता यजेत" इत्यादिश्रुतिभिरविशेषेण स्वर्गसाधनतया विहितानां दर्शपूर्णमासज्योतिष्टोमविश्वजिदादीनां परस्पर-निरपेक्षस्वर्गोपायानां यथा न व्यभिचारस्तथात्रापि व्यभिचारः परिहार्य्यः। न च तत्र फले तारतम्यं कल्पयित्वाव्यभिचारो वार्य्यते, प्रकृते न तत्सम्भव इति वाच्यम्। "सर्वेभ्यो दर्शपूर्णमासौ" इति तत्तत्कर्मसाध्यफलानि प्रति दर्शपूर्णमासयोः साधनत्वावगमेन फलतारतम्यकल्पनयापि तत्र व्यभिचारवारणासम्भवेन प्रकारान्तरस्यैवानुसरणीयत्वात्। एवमेव, यत्र

"चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।
आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ॥"

इति वचनेन अर्थार्थिशब्देनापूर्वस्वर्गाद्यैश्वर्य्यफलकाममभिधाय

तस्य भजनेन स्वाभिमतफलावाप्तिरभिहिता, तत्रापि व्यभिचारो वारणीयः ।

द्वितीयः इत्यादि, तत्तन्मताभेदप्रसङ्ग इत्यन्तं न युक्तं; फलैक्येऽपि तदुपायस्य भिन्नभिन्नस्य तत्तत्सम्प्रदायिभिस्तत्तत्प्रमाणानुसारेण प्रतिपादितत्वात्। अतएव, "विकल्पो विशिष्टफलत्वात्" इति सूत्रेण सर्वविद्यानां फलैक्यस्य प्रतिपादनेऽपि "नाना शब्दादिभेदात्" इति सूत्रेणैकफलसाधनानां विद्यानां परस्परभेदः प्रतिपादितः ।

फलस्येत्यादिकं शास्त्रानुष्ठानादर्शनविजृम्भितं, यथा एकफलसाधनस्यापि विद्याभेदस्याथर्वणिकाद्यधिकारिभेदेन शिरोव्रतादि-कर्मविशेषाङ्गकत्वं, तदभावश्च शास्त्रे संप्रतिपन्नः ; तथा मोक्षोपायतया विहितयोर्भजनप्रपदनयोर्मध्ये प्रपदननिष्ठानां, तदङ्गकार्पण्यपर्य्यवसायि-पारमैकान्त्यहेतु-शंखचक्राद्यङ्कनस्यावश्यकत्वात्। प्रपत्तिविद्या च "नाना शब्दादिभेदात्" इति सूत्रे व्यासार्य्यैर्विचारिता ।

किं चेत्यादिकं शास्त्रावलोकनप्रद्वेषविजृम्भितं, 'तत्प्रतिपादकशास्त्रे' इत्यस्मद्वाक्यगत-तच्छब्दार्थतया किमभिमतं भवद्भिः ? यदि भवदभिमत-शास्त्रविरुद्ध-शास्त्राविषय-सम्प्रदायस्तदा शास्त्रविरुद्धशास्त्राविषय-सम्प्रदायप्रतिपादके इत्यायातं, तदतिविरुद्धम्; तस्य शास्त्राविषयत्वे शास्त्रस्य तत्प्रतिपादकत्वासम्भवात्। यदि, श्रुतिस्मृत्यादिशास्त्रविरुद्ध-तदविषयार्थप्रतिपादके इत्युच्यते, तदा महत्कष्टमापतितम्। विकल्पकोटिः श्रुतिस्मृत्यनु-

कुलत्वं हि श्रुतिस्मृत्युक्तार्थप्रतिपादकत्वं तद्विरुद्धार्थप्रतिपादकत्वं वा स्यात्, अन्यस्य दुर्वचत्वात्, तथा च श्रुतिस्मृत्यविषय-तद्विरुद्धार्थप्रतिपादकं शास्त्रं श्रुतिस्मृतिविषयार्थप्रतिपादकमिति वा तद्विरुद्धार्थप्रतिपादकमिति वा स्यात्, स च बोधो न सम्भवति धर्मितावच्छेदकविशिष्टधर्मिज्ञानस्यैव तादृशविशिष्टज्ञान-हेतोस्तत्प्रतिबन्धकत्वात्। यद्यस्मदभिमत-शास्त्रसमधिगम्यः सम्प्रदायः, तदा तत्प्रतिकूलमिति न सम्भवति, शास्त्रसमधिगम्यार्थ-प्रतिपादकस्य तत्प्रतिकूलत्वासम्भवात्। प्रतिकूलत्वमपि हि प्राङ्निरुक्तानुकूलत्वसम्बन्धेन।

नाद्य इत्यादि, न; "ब्रह्मविदाप्नोति परं भक्त्या प्रपत्त्या वा महामुने प्राप्योऽहं नान्यथा प्राप्यः" इत्यादि शास्त्रे भक्ति-प्रपत्त्यादि-रूपसम्प्रदायपदार्थस्य मोक्षकारणत्वोपलब्धेः। न द्वितीय इत्यादि न; श्रुतिस्मृत्यादिशास्त्रप्रतिकूलस्यापि शब्दस्या-प्रामाण्य-ज्ञानसामग्र्यभावेऽप्रामाण्य-ज्ञानानास्कन्दितबोधजनक-त्वध्रौव्यात्; शास्त्रानुकूलस्यापि तस्याप्रामाण्यज्ञानसामग्रीसत्त्वे तदभावात्। सर्वत्र ज्ञानसामग्री स्वेतरसकलानपेक्षा स्वकार्य्य-मुत्पादयति, प्रतिबन्धकज्ञानाभावे, ह्रदो वह्निमानिति शब्दो विशिष्टज्ञानं जनयत्येव, तत्सत्त्वे ह्रदो जलवानितिशब्दोऽपि न विशिष्टज्ञानं जनयति।

बोधजनकत्वे प्रमाणाभावेनेत्यादि, तत्र प्रमाणं यद्यन्वेषणीयं, तदा तादृशबोधजनकत्वप्रमाजनकत्वे तस्य प्रमाणस्य प्रमाणान्तर-मन्वेषणीयमित्यनवस्था। तत्तदभिहितेत्यादि, न हि प्रयोजने

कश्चित् प्रवर्त्तते, अयं स्वर्गे प्रवर्त्तते, स्वर्गं करोतीति प्रयोगाभावात्, समानविषयकेष्टसाधनताज्ञानस्य प्रवर्त्तकत्वात्, उद्देश्यतया प्रवृत्तिविषयत्वमस्त्येव।

दुर्ज० "प्रश्नभेदेषु भवत्सम्मतिर्न वा? इति चतुर्थं वाक्यं विकल्पविषयकं, तदनुत्तरणीयं, तदनन्तरविकल्पसमाधानोत्तरेणैव मोत्तरत्वात्" इति।

टी० यद्यपि भेदेष्वित्यादि न प्रश्नवाक्यं किंपदाघटितत्वात्, तथापि पञ्चम-षष्ठवाक्ययोः प्रश्नवाक्यत्वादस्य च तच्छेषत्वात् प्रश्नान्तर्भावः। 'विकल्पविषयकं' भेदे सम्मति-तदभावकोटिकसंशयजनकम्। तदित्यादि, उत्तरवाक्योत्तरे भेदेषु सम्मतेर्वक्तव्यतया सम्मतिपक्षोऽङ्गीकृत इति स्पष्टमवगतेः पृथगुत्तरं न देयमिति भावः।

दुर्ज० "सम्मतिश्चेत्तदाचरणं कुतः? नासम्मतिश्चेत् कुतोऽङ्गीक्रियते? इति षष्ठं वाक्यं, सम्मतिश्चेदित्यत्र सम्मतिशब्देन किमुक्तं स्यात्? अभ्युपगममात्रं याथार्थ्येनाऽभ्युपगमो वा? यद्याद्यः पक्षः, तदा तत्तद्वादिकृतग्रन्थावलोकनविचाराध्यापनप्रवणानां ज्ञानमात्ररूपाभ्युपगममनुन्मत्तः को नेति ब्रूयात्? यद्यपरः पक्षः, तदा परस्परविरुद्धेषु विशिष्टार्थरूपेषु प्रतितन्त्रेष्ववच्छेदकावच्छेदेन यथार्थज्ञानरूपमभ्युपगमं स्वस्थानुन्मत्तः को ब्रूयात्?। सम्मतिश्चेत्तदाचरणं कुतो नेत्यत्र सम्प्रदायत्वावच्छेदेनाचरणं विवक्षितम्, उत सामानाधिकरण्येन? न द्वितीयः, सामानाधिकरण्येन तत्सत्त्वेन तदभावहेतोरपर्य्यनुयोज्य-

ज्ञात्। न च भवदाचार्य्यप्रतिपादितात् प्रतितत्त्वादन्यथाचरणा-भावहेतुः पर्य्यनुयुज्यत इति वाच्यम्, आचरप्रयोजकस्य यथा-र्थाभ्युपगमस्याभावस्यैव योगक्षेमसाधारण-तत्कारणत्वात्। अत-एव न प्रथमः, अवच्छेदकावच्छेदेनाचरण-प्रयोजकस्य यथार्थ-ज्ञानस्याभावात्।

'असम्मतिश्चेत् कुतोऽङ्गीक्रियते' इत्यत्राप्यनभ्युपगमेऽङ्गी-कारपूर्वोक्तानाचरणप्रतिकोट्याचरणरूपः किं निबन्धनः? इति हेतुपर्य्यनुयोगः कृतः, तत्र न ह्यवच्छेदकावच्छेदेनास्मदाचरणं युष्माभिरनुभूयते इति न तत्र हेतुपर्य्यनुयोगः, किन्तु सामा-धिकरण्येनाचरणे स्यात्, तत्र यथार्थज्ञानरूपाचरणहेतोः सत्त्वे-नासम्मतेरभावात् अयं पर्य्यनुयोगोऽत्यन्तासम्भवी" इति।

टी॰ प्रश्नवाक्ये सम्मतिश्चेदित्यत्र तच्चेत्यादि. सम्मति-विशिष्टे आचरणाभावबोधे विशिष्टवैशिष्ट्यावगाहिबोधमर्य्या-दया सम्मतिः सामानाधिकरण्यसम्बन्धेन नञर्थाभावे भासते, तथाच सम्मतिसमाधिकरणाचरणाभावो हेतुवृत्त्यसाधारणधर्म-प्रकारक-जिज्ञासाविषयवृत्तिहेतुतानिरूपकोऽस्तीति वाक्यार्थः। 'असम्मतिश्चेत् कुतोऽङ्गीक्रियते' इति वाक्यस्य सम्मत्यभावसमा-नाधिकरणाचरण-हेतु-वृत्त्यसाधारणधर्म-जिज्ञासाविषय-वृत्ति-हेतुतानिरूपकाचारविषये भेद इति वाक्यार्थबोधः।

षष्ठं वाक्यं पञ्चमवाक्यसहितमित्यादि, अस्य प्रश्नस्य वाक्य-द्वयात्मत्वात्। सम्मतिश्चेदित्यादि, अत्र वाक्ये संपूर्वकमतिधातुः ज्ञानमात्रार्थको वा याथार्थ्यरूपसम्पदार्थविशेषितज्ञानार्थो वा?

इति विकल्पप्रयुक्तोऽयं विकल्पः, प्रवचनानां कुर्वतां कारणशब्दे न कार्य्यव्यपदेशः ; ज्ञानस्यैवाभावेऽध्यापनपर्य्यन्तं कार्य्यं न सम्भवतीति भावः। अध्यापनादिकं प्रति ज्ञानमात्रं हेतुर्न तु यथार्थज्ञानं, अन्यथा तत्र तत्र पूर्वपक्षग्रन्थाध्यापनासम्भवप्रसङ्गादिति भावः ।

यद्यपर इत्यादि, परस्परव्यावृत्तधर्ममन्तरा सम्प्रदायविभागासम्भवेन प्रतितन्त्रार्थानां परस्परविरुद्धधर्माक्रान्तानां परस्परविरुद्धत्वम् । अवच्छेदकावच्छेदेनेत्यादि, प्रतितन्त्रार्थत्वव्यापकं विषयतया यथार्थज्ञानम्, अत्र याथार्थ्यं सर्वांशे विवक्षितं, तेन सर्वस्य विशिष्टज्ञानस्य किञ्चिदंशे यथार्थत्वेऽपि न क्षतिः । सम्मतिश्चेदित्यादि, सम्प्रदायत्वसमानाधिकरणं यदाचरणमाचारः तदभावे वा, सम्प्रदायत्वव्यापकं यदाचरणं तदभावे वा हेतुविशेषप्रश्न इति भावः । सूचीकटाहन्यायेन प्रथमं, द्वितीयपक्षं दूषयति, न द्वितीय इत्यादिना, कार्य्यस्यैवात्रासिद्धतया तत्कारणप्रश्नोऽसङ्गतः, गगनकुसुमे किं कारणम्? इति प्रश्नवदिति भावः ।

ननु भवदाचार्य्यप्रवर्त्तिते सम्प्रदाये भवतामाचरणसत्त्वेऽपि तदस्माचार्य्यप्रवर्त्तितसम्प्रदायत्वसामानाधिकरण्येन भवदाचाराभावो न गगनकुसुमायमान इति तत्र हेतुप्रश्नो नासङ्गत इति शङ्कते न चेत्यादिना । निष्कम्पप्रवृत्त्यात्मकाचारे यथार्थज्ञानस्यैव हेतुतया तत्र तदभावादेव पूर्वोक्तात् तदाभाव इत्याशयेन समाधत्ते, आचरणेत्यादिना । ननु आचरणाभावस्तदत्यन्ताभावस्-

प्रागभावो वा स्यात्, तयोरजन्यतया तत्र कथं कस्यचिद् हेतुत्वमित्यत आह, योगक्षेमेत्यादि। 'योगो'ऽसतः सम्पादनं, 'क्षेमः' स्थितस्य संरक्षणं, तच्च नाशात्यन्ताभावस्तत्प्रागभावो वा। तत्साधारणस्य, तत्सत्त्वे तत्सत्त्वं तदभावे तदभाव इति प्रतीतिविषयीभूतः स्वरूपसम्बन्धविशेषः कार्य्यकारणभाव इति भावः।

प्रथमपक्षं दूषयति, अतएवेति; अत इत्यस्य विवक्षितमर्थमाह अवच्छेदकावच्छेदेनेत्यादिना: अवच्छेदकावच्छेदेनेति, निष्कम्पप्रवृत्तावनवच्छेदकावच्छेदेन यथार्थ-ज्ञानस्य कारणतया, सामानाधिकरण्येन तत्सत्त्वेऽप्यवच्छेदकावच्छेदेन तदभावान्न तादृशमाचरणमित्यर्थः। 'असम्मतिश्चेत् कुतोऽङ्गीक्रियते?' इति प्रश्नवाक्यार्थमाह, असम्मतिश्चेत्यादिना। अनभ्युपगमेऽङ्गीकार इति, सति सप्तम्यास्तद्विधायकानुशासनावगतज्ञाप्यज्ञापक-भावापेक्षितसामानाधिकरण्य-पर्य्यवसायितया अनभ्युपगमसमानाधिकरणोऽङ्गीकार इत्यर्थः। पूर्वोक्तेति, 'सम्मतिश्चेदाचरणं कुतो न' इति वाक्योक्तेत्यर्थः। प्रतिकोटिः प्रतियोगि।

किं निबन्धन इति कुतः-शब्दार्थः। अत्रापि अवच्छेदकावच्छेदेनाचरणे सामानाधिकरण्येन वा आचरणे हेतुर्भवद्भिः पृष्ट इति विकल्प्य प्रथमं शिरो दूषयति, तत्र न हीत्यादिना। अवच्छेदकावच्छेदेनाचारो नास्त्येव, सामानाधिकरण्येनानुभूयमान आचारे हेतुर्यथार्थाभ्युपगमरूपः प्रागुक्त इत्ययं पर्य्यनुयोगो न सम्भवतीति भावः।

अत्रेदं विभावनीयं, प्रथमं सम्प्रदायशब्दस्य कोऽर्थः? इति

तस्य कति भेदाः? इत्यादिना सम्प्रदायपदार्थ-तदवान्तरविभाजकधर्म-तज्ज्ञापक-तत्फलविषयक-प्रश्नाः कृताः, तदुत्तरमपि प्रामाणिक-हृदयङ्गममुक्तम्। तत्प्रतारणार्थमन्यथैव सम्प्रदाय-पदार्थोऽस्मदभिप्रेतः तदनुसारेणैवोत्तरं देयमित्युक्तम्। इदानीं तदाचरणे हेतुः पृष्टः, यदि भवदुक्तो व्यवहारः सम्प्रदायपदार्थस्तदा व्यवहारे आचाररूपे कथमाचरणशब्दविवक्षितः आचारो भवितुमर्हति शब्दप्रयोगरूपस्य व्यवहारो नात्र विवक्षितुं शक्य इति प्रागावेदितमेव। 'अतस्तत्खण्डनम्' इति मत्तजपाक्लतया अङ्गन्यासादिवदियं प्रतारणा कृतेति।

सञ्ज० "इति रामानुजीयाः यस्य भेदेषु भवत्सम्मतिरस्ति न वेत्यस्मत्प्रश्नस्यायिमप्रश्नोत्तरेण सोत्तरत्वं प्रतिज्ञायाऽग्रेऽपि सम्मति-पदार्थत्वेनाभ्युपगम-याथार्थ्याभ्युपगमौ विकल्प्योभयमपि खण्डयित्वा न तु तत्रोत्तरं किञ्चिद्भावितं, न च सम्मतिशब्दस्याभ्युपगममात्रार्थकत्वेऽङ्गीकारो, यथार्थाभ्युपगमार्थकत्वेऽनङ्गीकार उक्त एवेति वाच्यम्; यथार्थाभ्युपगमप्रयोजकस्याप्रमितस्य वक्तुमशक्यत्वात्। तथाहि किं तावद्यथार्थाभ्युपगम-प्रयोजकम्? स्वेच्छा शास्त्रं शिष्टाचारो वा? नाद्यः, इच्छायाः किञ्चिन्नियम्यायाः यथार्थाभ्युपगमप्रयोजकत्वस्य दृढतरनियामक-निर्वचनमन्तरेणास्मान् प्रति वक्तुमशक्यत्वात्; अनियम्यायाः प्रयोजकत्वे स्वसम्प्रदायगत-यथार्थाभ्युपगमप्रयोजकत्वमेव, नेतरसम्प्रदायगत-यथार्थाभ्युपगम-प्रयोजकत्वमित्यस्य विनिगमकमन्तरेणावक्तव्यत्वात्।

न द्वितीयः, शास्त्रस्य स्वकल्पितस्य तत्प्रयोजकत्वे भवतामुन्मत्त-प्रलपितानुष्ठातृ-जनसाम्यापत्त्यावस्मदभिमत-सिद्धेः, आप्तप्रणीत-तत्प्रयोजक-शास्त्राभावात्, तस्यापि तत्प्रयोजकत्वासम्भवात् । न तृतीयः, तदभावादेव । तस्माद् यूयं प्रत्युत परस्पर-विरुद्ध-विशिष्टार्थरूप-सकल-सम्प्रदायम् अनाचरन्तोऽप्याचरन्तश्च स्वाचार्य्योपदेशोद्बोधित-याथार्थ्य-ज्ञानविजृम्भितमेकं कञ्चित्, 'वयं, सम्मतिश्चेत्, कुतो नाचरणमित्यसम्मतिश्चेत् कुतोऽङ्गीकारः ? इत्युभयथापि न प्रष्टव्याः' इति प्रश्नासङ्गतत्वमेव युक्त्या ह्युक्तवन्तः । तदपि नित्यत्वानित्यत्वादिषु वादि-विकल्पनाविषयतासद्भावेऽपि वस्तुभूते तस्मिन् विकल्पनाया असम्भवेन सम्प्रदायेषु परस्परविरोधाभावस्य स्वयंप्रदर्शितत्वात् भवदुक्तरीत्या सर्वेषां सम्प्रदायानां मोक्षफलकत्वाविशेषेणावान्तरसाधन-व्यत्यासस्याकिञ्चित्करत्वाच्च । सम्मतिश्चेत् समानफलकानां समानस्वरूपाणां सर्वेषामाचरणमेव यथासम्भवम्, असम्मतिश्चेन्न कस्याप्याचरणमिति समदृष्ट्यैव सद्भिर्वर्त्तितव्यं ; न तु समानफलके समानरूपे वस्तुभूते सम्प्रदाये कल्पितावास्तविकवैशिष्ट्य-विरोधज्ञान-परिकल्पित-याथार्थ्यायाथार्थ्योद्भावित-विषमदृष्ट्या, इति सत्परिपाटीमनादृत्य किमित्येकत्र निर्भराग्रहोऽन्यत्र तदन्यथात्वदुराग्रह इत्येतद्भवतां मत्सदृशगणानां सतामन्याय्यमिति अस्मत्प्रश्नाशयाऽनुरूपमुत्तरं भवति न वेति भवन्त एव मध्यस्थाः सन्तो वदन्त्विति इति तत्खण्डनम् ।"

व्या० यच्चेत्यादि उद्भावितमित्यन्तम् न सम्यक्, सम्मतिशब्द-

स्याभ्युपगममात्रार्थकत्वे भेदमात्रे साऽस्त्येव, यथार्थाभ्युपगमार्थकत्वे कचिद्भेदे साऽस्त्येवेति पञ्चमवाक्योत्तरेण पर्य्यवसन्नतया तत्र वक्तव्यं किमवशिष्यते ? यदाशया भवतां मनो जयपताकोत्थापनोन्मुखमभूत्। न चेत्यादिशङ्का च न अस्मदुक्त-यावदर्थपर्य्यालोचनानन्तरभाविनी, यथार्थाभ्युपगमपरत्वपक्षे सर्वथाऽनङ्गीकारस्याऽस्माभिरनभिधानात्। यथार्थाभ्युपगम-प्रयोजकस्याप्रमितस्य वक्तुमशक्यत्वादित्युक्त्वा, तथाहीत्यादिना तदुपपादनं कौशिकविवाहे शिवागानवदुपहास्यम् ; तथाहि मतिशब्देन ज्ञानसामान्यमुच्यते, समित्युपसर्गेण तत्र निष्कम्पप्रवृत्त्यनुकूलत्वं, तद्वतीति तत्प्रकारकत्वमुच्यते ; तदवच्छिन्नमतिप्रयोजकत्वं यदि तदवच्छिन्नकारणत्वरूपं, तदाऽप्रसिद्धिः, तस्यार्थसमाजग्रस्तस्य चैत्रावलोकितमैत्रनिर्मित-नीलतरघटत्वादिवत् कार्य्यतानवच्छेदकतया तदवच्छिन्नकार्य्यता-प्रतियोगिककारणत्वस्याप्रसिद्धिः। यदि कारणत्वातिरिक्तमेव किञ्चित् प्रयोजकत्वं, तदा गुणघटित-ज्ञानसामान्यसामग्र्येव तत्प्रयोजिकेति गृह्णन्तु भवन्तः।

गुणश्च विशेषणवद्विशेष्येन्द्रियसन्निकर्षः, यथार्थ-परामर्शः, यथार्थ-योग्यताज्ञानं ; स्वतस्त्वपक्षे तु ज्ञानसामान्य-सामग्र्येवेति स्वयमूह्यम्। एवं सति किं तावदित्यादिग्रन्थस्य कथमुत्थितिः ? अस्तु वा स्वपाण्डित्य-प्रकटनार्था रामपञ्चानन-वञ्चनार्था वा कथञ्चिदुत्थितिस्तथापि तन्न समीचीनतया प्रतिभाति यथार्थाभ्युपगम-प्रयोजकमित्यादिना यथार्थाभ्युपगमे प्रयोज्यता-सम्बन्धेनेच्छायां शास्त्रस्य शिष्टाचारस्य च विकल्पोऽभिहितः, पुरुष-

तन्त्रे हि कार्य्ये इच्छायाः प्रयोजकत्वम्, अपुरुषतन्त्रे यथार्थ-ज्ञानरूपे तादृशाभ्युपगमे तत्कथं ? न च यथार्थज्ञानापेक्षयाऽतिरिक्तः कश्चन सम्मतिपदार्थो यथार्थाभ्युपगमः, नवीनैर्वायुः प्रत्यक्षतया अभ्युपगम्यते, मीमांसकैः प्रमात्वस्य स्वतस्त्वमभ्युपगम्यते इत्यादौ तथा प्रतीतेः। तथा चेच्छान्तर्भावेण विकल्पोऽयुक्त एव ।

अतएव किञ्चिन्नियम्याया अनियम्याया वेति इच्छायाः किञ्चिन्नियम्याया इत्यादिशिरोद्वयदूषणोपन्यासोन्नीतविकल्पोऽपि नरविषाण-तैक्ष्ण्यातैक्ष्ण्यविकल्पवदुपहास्यः । किं चेच्छामात्रे नित्येच्छाव्यतिरिक्ते विषय-सौन्दर्य्यमिष्टसाधनत्व-ज्ञानादिकं च नियामकं, तदतिरिक्तं न किञ्चिन्नियामकं लोकशास्त्रयोर्दृष्टं श्रुतं वेति कथं तद्विकल्पः ? यदि यथार्थाभ्युपगमपदे नाविचाल्य-प्रवृत्तिरुच्यते, तन्नेच्छायाः प्रयोजकत्वं सम्भवत्येवेति पञ्चमप्रश्नवाक्यं विस्मृत्याप्युच्यते, तदा फलेच्छायां दृढतरनियामकं विषयसौन्दर्य्यमेवोपायेच्छायान्तु फलेच्छा-सहकृतमिष्टसाधनता-ज्ञानादिकमिति तन्निर्वचनं विभावयन्तु ।

अस्मानित्यादि, अनुज्झितशास्त्रमर्य्यादान् प्रति वक्तुं शक्यतेऽस्माभिः, न भवतः प्रति वक्तुम् । अनियम्याया इति, अनुपदमुक्तकारणातिरिक्तनियम्यत्वं कुत्रापीच्छायां नास्ति, तन्नियम्यत्वं सर्वत्रेच्छायामिति प्रागुक्तमेव । किं च "ब्रह्मविदाप्नोति परं" "मुमुक्षुर्वै शरणमहं प्रपद्ये" "ज्योतिष्टोमेन स्वर्गकामो यजेत" "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" "वायव्यं श्वेतमालभेत भूति-

कामः” इत्यादिश्रुतिवाक्यैस्तत्तत्फलसाधनतया ते ते उपाया अवगताः। “एवं विकल्पोऽविशिष्टफलत्वात्” इति सूत्रेण सर्वेषां सद्विद्याद्युपासनानां मोक्षैकफलत्वमवगम्यते। तत्र कश्चिन्मुमुक्षुः कस्मिंश्चिद्विद्याविशेषे, कश्चित्प्रपदने मोक्षसाधनता-ज्ञानेन प्रवर्त्तते, न तु स्वर्गसाधने यागादौ। एवं त्रिवर्गनिष्ठोऽपि मोक्ष-साधने, न प्रवर्त्तते, किन्तु यागे। तत्रापि तद्विशेषे तत्र नियामकापेक्षायां जन्मान्तर-तत्तज्जन्मकृत-सुकृतविशेषाधीन-तत्तत्-फलसौन्दर्य्यज्ञानाधीन-तत्तत्फलरुचि-सहकृतं तत्तदुपाये तत्तत्फलसाधनता-ज्ञानादिकमेव नियामकं वाच्यम्। एवं गुणविशेष-विशिष्ट-परब्रह्मानुभवोदर्कैकमोक्षेच्छूनामुपासनाभेदे; कैङ्कर्य्योदर्कैकमोक्षेच्छूनां विलम्बासहानां प्रपदने; अस्मदाचार्य्योपदिष्ट-प्रतितन्त्रार्थे विषयसौन्दर्य्येष्टसाधनत्वज्ञानाधीनेच्छया प्रवर्त्तत इति न विनिगमकाभावः।

'न द्वितीयः' इत्यादिकमपि सच्छास्त्रप्रद्वेषकृतम्; अस्मत्प्रतितन्त्रार्थ-प्रतिपादक-श्रुत्युपबृंहणतया परमर्षि-प्रणीतानां पद्मपुराणादिसात्त्विकपुराण-पञ्चरात्रागम-सात्त्विकस्मृतीनामस्मत्परिकल्पितत्वसम्भावनायां, शैवसौरादिसम्प्रदाय-प्रतिपादकानामपि तत्तत्प्रतिवादिभिस्तत्तद्वादिकल्पित-सम्भावनायां कृतायां, तत्तदुपबृंहणोपबृंह्यश्रुतिवाक्यानामपि तत्तद्वादिकल्पितत्वशङ्कायां, लोकायतव्यतिरिक्त-सकलसम्प्रदाया दत्ततिलाञ्जलयः स्युरिति शैवैः शाक्तैरपि भवद्भिः कल्पितैः शास्त्रैर्निर्णीतानेवार्थान् भवन्तोऽनुतिष्ठन्तीति भवतामुन्मत्त-प्रलपितानुष्ठातृजनसाम्यापत्तिः।

किं च शङ्करनीलकण्ठादिभिर्ब्रह्मसूत्राणां भाष्याणि कुर्वद्भिरपि तत्र पूर्वपक्षे तत्तन्मतविपरीतार्थप्रतिपादक-श्रुतिस्मृत्यादीनां वादिकल्पितत्वमभिधाय सर्वत्र स्वाभिमतसिद्धान्तो व्यवस्थापनीय इति तत्तच्छ्रुतिस्मृत्यादीनां स्वाभिमतप्रतितन्त्रार्थानुरोधेनार्थाभिधानप्रयासस्तेषां व्यर्थ एव स्यात्। एवमास्तिकानां परस्पर-कलहेन सर्वेषु श्रुतिस्मृत्यादिप्रमाणेषु तत्तद्वादिकल्पितत्वसम्भावनया व्याहत-प्रामाण्येषु जितं नास्तिकैः। एवं वैष्णवधर्मप्रतिपादक-सात्त्विकपुराणादिवक्तॄणां व्यास-पराशरादि-परमर्षीणामपि प्रकृतार्थगोचर-यथार्थज्ञानरूपाप्तत्वाभावे कुत्रापि प्रतितन्त्रार्थे आप्तप्रणीत-तत्तत्प्रयोजक-शास्त्राभावात् कुत्रापि यथार्थाभ्युपगमो न स्यात्।

'न तृतीयः' इत्यादिकमप्यसत्, अस्मदाचार्य्योपदिष्ट-प्रतितन्त्रार्थेषु महर्षिकुलप्रसूतानामाचारस्य तत्र तत्र पुराणपञ्चरात्रादिषु सुस्पष्टमुपलब्धेः। कल्पितत्वशङ्काशवमुष्टिमुद्वाप्य तत्तत्प्रमाणजातमवलोकयतां तदर्थप्रतीतिर्यथार्था भवतामपि स्यादेव।

तस्मादित्यादिकञ्चासत्, सकलसम्प्रदायमनाचरन्त आचरन्तश्च कञ्चिदेकमिति स्ववाग्विरोधमपि न जानन्ति। यद्यवच्छेदकावच्छेदेनाननुष्ठानं, सामानाधिकरण्येनानुष्ठानं विवक्षितमिति विभाव्यते, तदा कोऽयमुपालम्भः? सम्प्रदायस्य भवदभिमतस्य उपनयनाद्याचारस्याऽस्मदभिमतस्य वा तत्तत्प्रतितन्त्रार्थस्य वर्णाश्रम-वेदशाखादिभेदेनाधिकारिभेदेन च प्रतिनियत-

स्यानुष्ठानमपि सामानाधिकरण्येन, न त्ववच्छेदकावच्छेदेनेति सर्वेषां भवतामपि तादृशोपालम्भप्रसङ्गः ।

वयमित्यादिकमपि न समञ्जसं, न हि विशेष्यमात्रस्य सम्प्रदायपदार्थत्वमुक्तं, किन्तु तत्तद्विशेषणविशिष्टस्यैव, तत्र च विशेषणभेदपर्य्यवसायी वा विशिष्टस्यैव वा भेदोऽस्त्वेवेति परस्परविरोधाभावस्य स्वयमुक्तत्वादित्यारोप एव ।

एवं सर्वेषां सम्प्रदायानां मोक्षः फलतया तत्तदाचार्य्यैः सम्प्रदायप्रवर्तकैरनुसंहितः इति हि मयोक्तम्, न तु स एव फलमिति ; "अतएव सर्वेषां सम्प्रदायानां मोक्षाव्यभिचारोऽस्ति न वेत्यन्यदेतत्" इत्येवोक्तं न त्वव्यभिचारोऽस्तीति । कामशास्त्रेऽपि प्रवृत्त्यङ्गरुचिविशेषार्थं मोक्षफलस्यानुसंहितत्वेऽपि न सफलं भवितुमर्हति, अन्यथा निवृत्तिधर्मोपदेशस्य वैयर्थ्यापत्तेः । अतएव "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" "अपाम सोममम्रृता अभूम" इत्याद्यर्थवादानां विध्यपेक्षितस्तुतिपरत्वेन विध्येकार्थतया प्रामाण्यं व्यवस्थापितं प्रमाणलक्षणे सङ्गच्छते ।

एवमवान्तरसाधनव्यत्यासस्य कथमकिञ्चित्करत्वम्, तस्य सम्प्रदायभेदकत्वात् । अतएव महापशुपतिशब्दवाच्यस्य सदाशिवस्य शैव-कापालिक-कालामुख-पाशुपतानामैक्येऽपि तत्तत्तन्त्रोपदिष्टोऽघोरव्रताद्युपायभेदेन शैवसम्प्रदायेऽवान्तरभेदः स्वीकृतस्तान्त्रिकैः । सम्मतिश्चेदित्यादि चर्वितचर्वणं, कुत्रचिदेव यथार्थाभ्युपगम इत्यसकृदुक्ततया तस्य च सर्वाचरणाप्रयोजकत्वात् ।

यथासम्भवमिति तु युक्तमेव, सर्वतन्त्रसिद्धान्तार्थेषु सत्याजवादिषु सर्वेषामाचारदर्शनात्, प्रतितन्त्रार्थेष्वेव हि तत्तत्सम्प्रदाय्यनुष्ठान-नैयत्यम्।

एवं यत्रासम्मतिस्तत्रानाचरणमापादनीयं, सम्मत्यभावस्य स्वाधिकरणे एवाचाराभावप्रयोजकत्वात्, न केनापि सम्प्रदायिना समदृष्टिः सर्वत्र क्रियते, सामगैरुपनयनेऽनुष्ठीयमानस्य सशिख-वपनस्याऽन्यैरननुष्ठानात्; कापालिकव्रतस्य शैवैरननुष्ठानाच्च। सर्वेषां सम्प्रदायानां मोक्षफलस्योद्देश्यतया तत्तदाचार्य्यैरनुसंहितत्वेन सफलं भवत्येवेत्युच्यते, कुत्रचिदर्थे विरोधेऽपि अदृष्टार्थांशेऽविरोधानामेव मोक्षकारणत्वसम्भवात्। अतएव गुरुभट्टसम्प्रदाययोः परस्परानङ्गीकृतार्थविशेषाङ्गीकारेऽपि स्वर्गादिफलसाधन-कर्मानुष्ठान-विकल्पाभावेन स्वर्गादिफलोद्देश्यकत्वम्। अन्यथा सर्वसम्प्रदायानामनुष्ठानपर्य्यवसायिनां मोक्षरूपफलाविशेषे सदसत्सम्प्रदाय-व्यवस्थाभङ्गः स्यात्। यत्र सम्प्रदायेऽर्थविशेष-वृत्तितया निरूपितं वैशिष्ट्यं तात्त्विकं, स सत्सम्प्रदायः, यत्र त्वतात्त्विकं, सोऽसत्सम्प्रदायः, एवं सर्वप्रतितन्त्रार्थानां समानरूपत्वमपि नास्त्येव। अन्यथैकप्रतितन्त्रत्वापत्त्या सर्वतन्त्रसिद्धान्त-विलक्षणप्रतितन्त्र-सिद्धान्तोच्छेदापत्तेः। सिद्धान्तस्य, सर्वतन्त्रसिद्धान्त-प्रतितन्त्र-सिद्धान्ताभ्युपगमसिद्धान्ताधिकरणसिद्धान्तभेदेन चातुर्विध्यं तान्त्रिकैः प्रतिपादितम्।

एवं "तस्माद् वा एतस्मादात्मनं आकाशः संभूतः" इति

श्रुत्या प्रतिपादितमाकाशस्यानित्यत्वमनङ्गीकृत्य, "न हि वचन-विरोधे न्यायः प्रवर्त्तते" इति न्यायम्,

"आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥"

इति स्मृतिसिद्धं विस्मृत्य लाघवादिन्यायमात्रमवलम्ब्य नित्यत्वं प्रतिपादयन्ति नैयायिकाः। न हि, तत्रोभयोरपि धर्मयोर-तात्त्विकत्वं सम्भवति, विरुद्धयोर्भावाभावयोर्मध्ये एकस्यावश्यं-भावात्, याथार्थ्यायाथार्थ्योद्भाविता विषमदृष्टिरुचितैव सताम्। ब्राह्मणे चण्डाले च समदृष्टिर्न सती, "ब्राह्मणे गवि हस्तिनि शुनि चैव श्वपाके च" इत्यादिकं शरीरातिरिक्तविलक्षणात्म-स्वरूपे साम्यदर्शनपरमिति न तद्विरोधः।

एवं यत्र सम्प्रदायेऽस्माकं याथार्थ्यज्ञानं, तत्रैव निर्भराग्रहो-ऽन्यत्रायाथार्थ्यज्ञानादनाग्रहो युक्त एव; कथमन्यथा भवन्तः क्वाचित्के अत्यर्थवद्भासमाने सम्प्रदाये आग्रहं कुर्वाणास्तदन्यानेक-श्रुतिसम्प्रतिपन्नं सम्प्रदायं निन्दन्ति। किं च दर्पणस्य वस्तुनोऽ-न्यथाभानप्रयोजकं मलमिव, मनसोऽन्यथा-भानप्रयोजकमस्मन्मत-मात्सर्यमुत्सार्यास्मदुत्तरं सम्यग्विचारयतां भवतां तत्र भवत्प्र-आनुकूल्यनिश्चयो भवेदेवेत्यलं दैवहतमुद्गराभिघातेन।

दुर्ज० "अत्रैव विकल्प-दूषणवाक्ये, किं वर्णनिष्ठः ?" इति वाक्यं जिज्ञासाबोधक-किंपदघटितं दृश्यते, तस्यायमर्थो भवेत्, उपरितनवाक्यानुसारात् वर्णनिष्ठत्वं वर्णविशिष्ट-पुरुष-निष्ठत्वं, वर्णश्च ब्राह्मणादिः, तद्वन्निष्ठत्वं च तदधिकारकत्वं, तस्य

च सम्प्रदाये साक्षादसम्भवात् तज्ज्ञानस्यानुष्ठानपर्य्यवसायिनस्तत्त्वं वाच्यम्। तथा च सम्प्रदायज्ञानस्यानुष्ठानपर्य्यवसायिनोऽधिकारो वर्णे वर्णत्वावान्तरधर्मविषयकजिज्ञासाविषय इति पर्य्यवस्यति ।

तत्रोत्तरम् । सम्प्रदायान्तरेष्वधिकारस्यास्माभिरवक्तव्यतयाऽस्मत्पूर्वाचार्य्यसम्प्रदाये स उच्यते सर्ववर्णनिष्ठ इति, तथा च वर्णत्वावच्छिन्नाधिकार इत्यर्थः। वर्णत्वं च सर्ववर्णनिष्ठो धर्मः ; स च जातिरुपाधिर्वेत्यन्यदेतत्। सर्ववर्णनिष्ठत्वं तावदित्थं,—सम्प्रदायप्रयोजने मोक्षे सर्वेषामधिकारोऽस्त्येव, अर्थित्वमात्रसापेक्षत्वात्तस्य, तदुपाये प्रतितन्त्वार्थेऽर्थित्वं सामर्थ्यं चापेक्षितम्। अर्थित्वं च फलविषयिणी इच्छा, सामर्थ्यं वैदिके उपासने भक्तिशब्दवाच्येऽग्निविद्यावत्त्वम् । स्मार्ते च नामसङ्कीर्त्तनपुण्यदेशवासतीर्थस्नानादीनामेवाङ्गत्वात् तदनुगुणसामर्थ्यम् ।

अत्रोपासनस्य भक्तेर्वैदिकत्व-स्मार्त्तत्वभेदः कथमिति चेत्, एवम्, वैदिक-वेदाधिकारि-त्रैवर्णिकमात्रानुष्ठेय-यज्ञादि-कर्माङ्गकतया वैदिकत्वम्। स्मृतिपुराणाद्युक्त-नामसङ्कीर्त्तनादिगौणभक्तिशब्दाभिधेय-तीर्थस्नानाद्यङ्गकतया स्मार्त्तत्वमिति । तत्र प्रथमस्य त्रैवर्णिकाधिकारकत्वमेव, द्वितीयस्य वर्णचतुष्टयाधिकारकत्वम्। यथा वा स्वर्गरूपफलं प्रति श्रुतिस्मृत्यादिभिरुपायत्वेनाभिहितानां ज्योतिष्टोमदर्शपूर्णमासादियागविशेष-गङ्गास्नानादीनां मध्ये यागस्य त्रैवर्णिकाधिकारकत्वं गङ्गास्नानादीनां तु सर्ववर्णाधिकारकत्वम् ; एवमस्मदाचार्य्यप्रतिपादितेऽप्युपाय-

विशेषेऽनेकहेतुभिर्भक्त्यादानधिकारिभिरधिकार्ये पुरुषविद्यादानु-कूल्यसङ्कल्पादिश्रौतस्मार्त्ताङ्गकेऽपि त्रैवर्णिक-चातुर्वर्णिकाधिकार-कत्वं बोध्यमिति। एवं सप्तमवाक्यघटकं "किमाश्रमनिष्ठः ?" इति वाक्यमप्युक्तार्थकमुक्तोत्तरकम्। परन्तु "सर्वाश्रमबहिर्भूत-स्यापि विधुरादेरप्यधिकारो बोध्यः" इति।

टी० 'किंवर्णनिष्ठः' इति, प्रश्नवाक्यस्यायं वाक्यार्थबोधः।

अत्रोद्देश्यतावच्छेदकतावच्छेदकान्वयि-स्वार्थबोधकः किं-शब्दः, तदर्थश्च किञ्चिद्धर्मप्रकारक-जिज्ञासाविषयः। स च धर्मः किंपदार्थान्वयितावच्छेदक-वर्णत्वन्यूनवृत्तिरिति व्युत्पत्तिबला-ल्लभ्यते। तादृशकिंपदार्थस्याभेदेन वर्णपदार्थेऽन्वयः। तथा च वर्णत्वन्यूनवृत्ति-धर्मप्रकारकजिज्ञासा-विषयाभिन्नवर्णनिरूपिता-धेयतावदभिन्नसम्प्रदायभेदो भवतीति; अस्य प्रश्नवाक्यस्यार्थं सोपपत्तिकमाह, तस्येत्यादिना। उपरितनेति, वर्णनिष्ठस्येदि-त्यादिवाक्यानुसारात् वर्णत्वावान्तरधर्मावच्छिन्ननिष्ठस्येदित्यर्थः। तथा च तत्र वर्णत्वावान्तर-धर्मावच्छिन्ननिष्ठत्वमेतत्प्रश्नोत्तर-वाक्यस्यार्थमुपजीव्य प्रश्नान्तरावतारात् वर्णत्वावान्तरधर्माव-च्छिन्न-वर्णनिष्ठत्वबोधकोत्तर-वाक्याभिधान-प्रयोजक-जिज्ञासा-घटित एवास्य प्रश्नवाक्यस्यार्थः स्यादिति भावः। वर्णनिष्ठत्व-मित्यादि, वर्णत्वस्य जात्यादिरूपतया तत्र सम्प्रदायपदार्थस्य वृत्त्यसम्भवात्, तदन्वययोग्यः पुरुष एव लक्षणया वर्णशब्देन बोध्यते इति भावः। तद्वन्निष्ठत्वमित्यादि, तदधिकारकत्वमिति, यथा "स्वर्गकामो यजेत" इत्यत्र स्वर्गकामनाविशिष्टस्य याग-

विधिनियोज्यत्वे स्वर्गकामनायास्तदधिकारत्वं, तथेति भावः। सम्प्रदाये साक्षादसम्भवादिति, सिद्धासिद्धसाधारणसम्प्रदायपदार्थस्य स्वरूपे वर्णाधिकारकत्वासम्भवादित्यर्थः। 'तज्ज्ञानस्य' सम्प्रदाय-पदार्थज्ञानस्य, 'अनुष्ठानपर्य्यवसायिनः' अनुष्ठानावेक्षितस्य, 'तत्त्वं' वर्णाधिकारकत्वम्। तथा चेति, इति पर्य्यवस्यतीति, तादृशवाक्याधीन-शाब्दबोधानन्तरमेतादृश-मानसबोध उपनीतभानात्मको भवतीत्यर्थः। तादृशशाब्दबोधस्योपनायकस्य सत्त्वादिति भावः।

तत्रोत्तरमिति, उच्यत इति शेषः। सम्प्रदायान्तरेष्वित्यादि, अस्याः प्रश्नावल्याः सर्वेभ्यः सम्प्रदायिभ्यो दत्ततया यो यः सम्प्रदायी प्रश्नानामुत्तरं वक्ष्यति स स्वसम्प्रदायाधिकारमपि वक्ष्यतीति भावः। 'स उच्यते' अधिकार उच्यते। इत्यर्थ इति, वर्णत्वव्यापकाधिकारताक इत्यर्थः। सर्वशब्दस्य उद्देश्यतावच्छेदकव्याप्यविधेय-व्याप्य-पर्य्याप्तिक-धर्मप्रवृत्तिनिमित्तकतया वर्णत्वव्यापकसम्प्रदायाधिकारव्याप्या या वर्णगतयावत्त्वपर्य्याप्तिस्तत्प्रतियोगी यावत्त्वधर्मः, तद्वदभिन्नवर्णनिष्ठ इति वाक्यार्थबोधेऽधिकारे वर्णत्वव्यापकपर्य्याप्तिव्यापकत्वं तुल्यवित्तिवेद्यतया भासते, तत्रापि तद्व्यापकव्यापकस्य तद्व्यापकत्वनियमादिति भावः।

अन्यदेतदिति, स्वविषयतानतिरिक्तवृत्तिप्रकृतजिज्ञासानिवर्त्तकत्वको योयस्तदन्यदित्यर्थः। वर्णत्वव्यापकत्वमधिकारत्वे उपपादयति, सर्ववर्णेत्यादिना, बोध्यमित्यन्तेन; 'सम्प्रदायप्रयोजने'

सम्प्रदायप्रयोजनतया तत्तदाचार्य्याभिमते, 'वैदिके' श्रौतकर्माङ्गके, 'उपासने' उपासीतेत्यादिश्रुतिविहिते। नन्पासनस्योपायत्वे, "भक्त्या त्वनन्यया शक्यः," "ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप", "भक्त्या प्रपत्त्या वा महामुने प्राप्योऽहं नान्यथा प्राप्यः" इत्यादिना भक्तिप्रपत्त्योरेव मोक्षोपायत्वप्रतिपादनं कथमुपपद्यते? इत्यत आह, भक्तिशब्दवाच्य इति; उपासनमेव, "यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्" इति श्रुत्युक्तप्रीतिरूपत्वमापन्नं भक्तिरिति भावः। 'अग्निविद्यावत्त्वम्' अग्निश्च विद्या च तद्वत्त्वम्। 'स्मार्त्ते' स्मार्त्तकर्माङ्गके, 'तदनुगुणसामर्थ्यम्' तत्तत्कर्मानुष्ठानोपयोगिनी शक्तिः। 'नामसङ्कीर्तनादीति', नामसङ्कीर्तनादिरूपा ये गौणभक्तिशब्दाभिधेया इत्यर्थः। 'तत्र' तयोर्भक्त्योः। 'प्रथमस्य' वैदिकोपासनस्य, 'त्रैवर्णिकाधिकारकत्वमेव' इति, त्रैवर्णिकानामेवाग्निविद्ययोः सम्भवादिति भावः। उक्तमर्थं दृष्टान्तेन द्रढयति, यथैवेत्यादिना, एवमित्यादि, 'आचार्य्यप्रतिपादिते' उक्त्यनुष्ठानाभ्यामुपदिष्टे, 'उपायविशेषे' उपायत्वावान्तरप्रपत्तित्वरूपधर्मावच्छिन्ने, अनेकहेतुभिर्भक्त्याद्यनधिकारिभिरधिकार्य्ये इति, अज्ञत्वादिभिः प्रपत्त्यङ्गाकिंचनाप्रयोजकैरनेकैर्हेतुभिरित्यर्थः। अत्र "भक्त्यादौ शक्त्यभावः" इति वेदान्ताचार्य्योक्तश्लोकोऽनुसन्धेयः। 'भक्त्याद्यनधिकारिभिः' आदिशब्देन पुराणप्रक्रियोक्ताङ्गाङ्गिभावापन्नकर्मज्ञानसंग्रहः। पुरुषविद्यादीति, "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिप्रसादं, मुमु-

चुर्वै शरणमहं प्रपद्ये” इति श्रुत्युक्तप्रपत्तेरङ्गतया “तस्यैव विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्मं लोमानि बर्हिर्वेदः शिखा हृदयम्” इत्यादिना, “यन्मरणं तदवभृथः एतद्वै जरामर्य्यमग्निहोत्रम्” इत्यन्तेन प्रतिपादित-पुरुषविद्याङ्गके, “न्यासमेषां तपसामतिरिक्तमाहुः” इत्यादिश्रुतिभिः सर्वोत्कृष्टोपायत्वेन प्रतिपादिते, “आनुकूल्यस्य सङ्कल्पः, प्रातिकूल्यस्य वर्जनम्” इत्यादि-स्मृतिवाक्योक्तानुकूल्य-सङ्कल्पादिपञ्चाङ्गयुक्ते च प्रपदने इत्यर्थः। त्रैवर्णिकेत्यादि, यथाक्रममित्यादि ; ‘सर्वाश्रमबहिर्भूतस्य’ आश्रमत्वव्याप्यधर्मशून्यस्य, ‘विधुरादेः’ मृतदारादेः ।

सञ्ज० “इति रामानुजीयाः, यच्च किंवर्णनिष्ठः ? इति किमाश्रमनिष्ठः ? इत्यनयोर्वैशत्वावान्तरधर्मविषयकजिज्ञासाविषयकमस्मदनभिप्रेतमपि महता प्रयासेन स्वयं परिकल्प्य, सर्ववर्णनिष्ठ इति वर्णत्वावच्छिन्नाधिकार इत्यर्थकं सोपपत्तिकमुत्तरं महता वाक्यप्रबन्धेन स्वपरसम्प्रदायिषु अत्यन्तगोप्यमपि शूद्राचार्य्यप्रवर्त्तितत्वं स्वसम्प्रदायस्य शूद्रेष्वतीव कृपया सूचयद्भिर्दत्तं, तदप्यपेशलं, भवदीय-सम्प्रदायस्य शूद्रप्रवर्त्तितत्वस्य भवदीय-सम्प्रदायनिदानोत्पत्तिबोधकश्रीनिवासाचारिकृतदिव्यसूरिचरित्रादवगततया, द्विजात्यनर्हत्वेन। तत्र वर्णत्वावच्छिन्नाधिकार इत्यस्य बालैरप्यवाच्यत्वात्। परञ्च, किंवर्णनिष्ठः ? किमाश्रमनिष्ठ ? इत्यनयोः किंवर्णवतामयं धर्मः ? यथोपनयनादिरथवाऽऽश्रमवतामयं धर्मः ? यथाऽग्नीन्धनभैक्ष्यचर्य्यादिः, इत्येतादृशार्थस्यापि प्रतीयमानत्वेन वर्णाश्रमवत्सुसम्प्रदायस्य

वर्णनिमित्तकत्वमाश्रमनिमित्तकत्वं, तत्तात्पर्य्यविषयीभूत विकल्पावगाहि-जिज्ञासारूपमस्मदभिप्रेतं स्थितम्। वर्णे निष्ठास्थितिर्यस्य आश्रमे निष्ठास्थितिर्यस्येति विग्रहबोधित-वर्णाधिकारकस्य दायस्थितेर्निमित्तनिमित्तिभावेनैवोपपाद्यत्वात्, वर्णादेरत्र निमित्तत्वं तु तदनुष्ठानकर्त्तृअधिकारसम्पादकतयेति; एवं-रीत्याऽस्मदभिप्रायमुद्भाव्य नोत्तरं दत्तम्; तावता स्वाभिप्रेतहानाद् असम्मतिरपि जातैवेत्यलमतिप्रसङ्गेन इति तत्खण्डनम्" इति।

व्या० यच्चेत्यादि अवाच्यत्वादित्यन्तम्, अतिबालिशप्रलपितमिव प्रतिभाति, मद्विषाभिप्रायेण प्रयुक्तमपि गजशब्दं शृण्वन् कश्चिन्मनस्वी, को गजः? इति प्रश्नस्य शुण्डादण्डप्रधावितक्षुद्रजन्तुसमवायो दानजलास्वादमत्तभ्रमरीगीत-मुखरित-दशदिक् अतिधीरस्वभावो गम्भीरहस्तीगज इति वदति चेत्, तं प्रति नायमुपालम्भो युक्तः, यद् गजशब्देनास्मद्विवक्षितो मद्विषस्तमभिप्रायं विभाव्य न तदर्हमुत्तरं भवता दत्तमिति, व्यक्तीभविष्यति चानुपदमेव भवदभिमतार्थबोधकं किमपि पदमत्र नास्तीति। अतः भवदुक्तवाक्यस्यानुज्झित-शास्त्रमर्य्यादानां योऽर्थो भवद्वाक्येन प्रतीयते, तमर्थमभिप्रेत्योत्तरं दत्तम्। न हि शब्दार्थनिर्वचनसमर्थानां शब्दार्थनिर्वचने कोऽपि प्रयासः। वयं तु स्वयं कल्पकाः, न तु यस्मात् कस्माच्चित् यं कञ्चिदर्थविशेषं श्रुत्वोपपादयामः, निरुपपत्तिकोत्तराभिधानमनिरूपकाणामेवोचितम्। परिमितवाक्यैर्येषां विवक्षितार्थज्ञानं न

अवितुमर्हति, ते महता प्रबन्धेनैव बोधनीयाः। ये तु स्वप्रयुक्त-वाक्यार्थमपि स्वयं न जानन्ति, ते अन्यशब्देन न बोध्यते।

"गुह्यं प्रकाशयेद् धीमान् मन्त्रं यत्नेन गोपयेत्।
अप्रकाशप्रकाशाभ्यां चोर्यते सम्प्रदायुषी॥"

इति स्मृतिवचनार्थाभिज्ञानां न तद्विरुद्धं गुरुगोपनमुपपद्यते, "शूद्राचार्य्यप्रवर्त्तितत्वम्" इत्यादिकं शेषं "को येन पूरयेत्" इति वचनार्थं स्मारयति। अत्र हि ग्रामणीजनविवादः प्रारब्धः, न ह्यत्र शूद्राः प्रतिपाद्याः, कथं तेषु कृपा सूच्यतेऽनेनोत्तर-वाक्येन?। "भवदीयसम्प्रदायस्य" इत्यादि, परमर्षिभि-र्बौधायनादिभिः प्रवर्त्तितत्वस्य अस्मत्सम्प्रदाये उक्ततया श्रीशठ-कोपस्य,

"स विप्रेन्द्रो मुनिः श्रीमान् स यतिः स च पण्डितः।"

इत्यादिवचनोक्तविप्रेन्द्रत्वादेरुपदेष्टृत्वयोग्यताया विश्वामित्रवीति-होत्रादिपुराणपुरुषवृत्तान्तोपन्यासपूर्वकं महता ग्रन्थेन वक्तव्य-तया शवमुष्टितुल्यम्। भवदीयसम्प्रदाय-निदानोत्पत्तिबोध-केत्यादि; अनभिज्ञाः खलु भवन्तो ग्रन्थावलोकन-तदर्थावगाह-नादिषु, देवानांप्रियाः, न हि तद्ग्रन्थे सम्प्रदायस्य अस्माकं प्रथम-प्रवर्तकत्वं श्रीशठकोपमुनेरुक्तम्, किं पुनर्धर्मव्याधादिवत् कौशि-कादीनां नाथमुनेरुपदेष्टृत्वमेव, अतस्तस्य सम्प्रदायादिकारणत्वं तत्र कथमुक्तं स्यात्?। "द्विजात्यनर्हत्वेन" इति, अज्ञातसच्छा-स्त्रवृत्तान्तगम्भानां भवादृशानाम् ईर्ष्याद्वेषदूषित-मनस्कतया तद्योग्यतापायेऽपि न सत्सन्तानप्रसूत-सदाचारनिष्ठवेदविदाश-

र्थोपदेश-संसिद्धसकलशास्त्रवैशारदानामन्येषामपीति विभावयन्तु भवन्तः ।

परं चेत्यादिना, "प्रतीयमानत्वेन" इत्यन्तेन शब्दार्थनिर्वचन-कुशलताऽऽविष्कृता भवद्भिः । अहो कष्टम्! "किं वर्णवतामयं धर्मः ?" इति स्वाभिमतार्थबोधनार्थमुक्ते वाक्ये किं-शब्दार्थस्य वर्णपदार्थेऽभेदेनान्वय-विवक्षायाम् 'अस्य पिता' इति वदन्त-मवधूय 'अस्यायं मातुः पतिः' इति वदतां वाक्यवत् असदुक्तार्थ एव पर्य्यवस्यति । अतः 'अयं वर्णवतां धर्मः किम्?' इति योजना कर्त्तव्या, तदा नायं शब्दस्त्वदभिमतार्थाभिधायी; तथाहि, न ह्येदं किंपदमुद्देश्यसमर्पकं, 'कः पचति' इति-वाक्यस्य-किं-पदवत् । नाप्युद्देश्येऽभेदेन विशेषणतापन्नस्य बोध-कम्, 'को ब्राह्मणः पचति ?' इत्यादाविव । नाप्युद्देश्यतावच्छे-दके अभेदेनान्वयि-स्वार्थबोधकम्, 'कति घटाः सन्ति ?' इति-वाक्यस्थमिव । नाप्युद्देश्यतावच्छेदकतावच्छेदक-विशेषणता-पन्नार्थबोधकं, 'भवतः कस्य पुत्रस्य भार्य्या सुशीला ?' इत्यादा-विव । नाप्युद्देश्यतावच्छेदकतावच्छेदकतावच्छेदक विशेषणताप-न्नार्थबोधकं, 'भवतः कस्य पुत्रस्य भार्य्यागुणः सुपेशलः ?' इत्या-दाविव । नापि विधेय-समर्पकम्, 'अयं कः ?' इत्यादाविव । नापि विधेये तदवच्छेदके वा अभेदेन भेदेन वा अन्वयिनः स्वार्थस्य बोधकम्, 'इदं किं द्रव्यम्, भवतः कति पुत्राः, इदं कस्य धनम्, भवान् कस्य पुत्रः?' इत्यादाविव । एतादृशस्थले-ष्वेव किंपदस्य जिज्ञासाबोधकत्वम् । एवं कुत्सायाम्, अव्यय-

किंशब्दोऽपि, 'किं गौः ?' इत्यादाविव न भवति, अपि तु वा-शब्दादिवत् वितर्कार्थको भवेत्, 'किमिन्दुः? किं पद्मम् ?' इत्यादाविव। वितर्कश्च सम्भावना ; तथा च 'वर्णवतामयं धर्मो न वा ?' इति सम्प्रदायविशेष्यकवर्णवद्वृत्तिधर्मत्वतदभावकोटि-सम्भावनाविषयक एव वाक्यार्थबोधः स्यात्, किमिन्दुरित्यादौ भावद्वयकोटिक-सम्भावना प्रतीयते, अत्र तु भावाभावकोटिकेति विशेषः।

अथोपनयनादिरिति दृष्टान्तोऽपि प्रकृताननुगुणः, उपनयनादेर्वर्णवद्वृत्तिधर्मत्वेन निश्चितत्वात्। 'किं वर्णवतामयं धर्मोऽथ वा आश्रमवतामयं धर्मो वा ?' इति शब्दार्थस्वरूपानभिज्ञानकृतम्, उत्कटैककोटिक-संशयरूपसम्भावनायाः कोट्योर्मिथोविरोधाभावेऽसम्भवात् आश्रमस्य वर्णव्याप्यतया, वर्णाश्रमधर्मयोः परस्परं विरोधाभावात्। भैक्ष्यचर्यादिदृष्टान्तोऽपि पूर्ववत् प्रकृताननुगुणः। इत्येतादृशार्थस्यापीत्यादि, अस्मदभिप्रेतमित्यन्तं, देवानामग्रे महतामुपपादनम्, सम्भावना-रूपार्थस्य प्रतीयमानत्वेन, जिज्ञासा-रूपमस्मदभिप्रेतमिति कथमुपपद्यते। न हि सम्भावना जिज्ञासा, तदुपपादिका वा, अतः कथं तद्बोधकशब्दं प्रयुञ्जानस्य तदभिप्रेतं भवेत्। अस्तु वा सम्भावनायाः कथञ्चिद् जिज्ञासोपपादकत्वं, तथापि न निस्तारः, जिज्ञासाबोधकशब्दान्तरमन्तरेण तद्बोधानुपपत्तेः।

किं च, सम्प्रदायस्य वर्णनिमित्तकत्वं हि वर्णवदनुष्ठेयत्वम्, एवमाश्रमनिमित्तकत्वमपि ; अनुष्ठेयत्वमनुष्ठानविषयत्वं, तत्तत्ता-

तदर्थविषयोऽपि न जिज्ञासारूपं, व्यधिकरणं च जिज्ञासायाः, सम्प्रदायस्य वर्णनिमित्तकत्वाभिधानमपि सम्प्रदायशब्दस्य प्रागुक्त-त्रिविधव्यवहारार्थकत्वं तदन्यतमार्थकत्वं वा वदतः कण्ठग्राहिण्याः कृत्यापिशाच्याः समुत्थानम्। किं च जिज्ञासायाः विकल्पाव-गाहित्वमपि प्रकृते कथं भवति, विकल्पो हि प्रकृते सम्भावना सम्भाव्यमानधर्मो वा ? तदवगाहिजिज्ञासाबोधकं हि, 'का सम्भावना ?' 'सम्भाव्यमानो धर्मः कः ?' इति ; तादृशप्रश्न-वाक्याभावात्। किं च प्रकृताव्यय-किंशब्दस्य विकल्पार्थकत्वे जिज्ञासाबोधक-पदाभावात् कथं तस्या अभिप्रेतत्वं ? यदि जिज्ञासारूपमित्यस्य जिज्ञासाया रूपमिति विग्रहे रूप्यतेऽने-नेति करणव्युत्पत्त्या जिज्ञासाविषयधर्मः प्रतिपाद्यते इति ; स च धर्मो वर्णवद्धर्मत्वादिकमिति न काचिद् अनुपपत्तिरिति विभाव्यते, तदा विकल्पावगाहीत्यनुपपन्नम्। वर्णे निष्ठा स्थिति-र्यस्येत्यादिकमप्यस्मद्वचः परिपाटी-शिक्षितमिति न तद्दूषणा-र्हम्। अस्मदभिप्रायम् उद्भाव्येति सदुपहास्यम्। एवं विप्रलप-तामभिप्रायोद्भावनं भवादृशानामेव भवेत्। अस्मदुक्तेऽर्थे समी-चीनेऽसमीचीने वा भवतामसम्मतिर्दुस्त्यजा, तस्या ईर्ष्याद्वेषमात्र-निदानकत्वात्।

दुर्ज० "प्रश्नः, वर्णनिष्ठश्चेत् सम्प्रदायपूर्वको वर्णः वर्णपूर्वकः सम्प्रदायो वा ? इति सप्तमं वाक्यम्।

प्रश्नः, आश्रमनिष्ठश्चेत् सम्प्रदायपूर्वक आश्रम आश्रम-पूर्वकः सम्प्रदायो वा ? इत्यष्टमं वाक्यम्। तयोरिदमुत्तरम्,